No. ७२४८

Title शास्त्रदीपिका द्वितीयोऽध्यायः

Author पार्थसारथिमिश्रः

Extent ६६ पत्र Age सं.१८७१

Subject मीमांसा

प्राणसूत्रदीपिकाद्वितीयाध्यायः

४२४८

शास्त्रदीपिकायांद्वितीयोध्यायः

~~खंडित~~ शास्त्रदीपिका

श्रीगणेशाय नमः ॥ भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्र तीयेतैष ह्यर्थो विधीयते ॥ प्रथ
मेऽध्याये धर्मस्य प्रमाणं निरूपितं । तत्र प्रथमे पादे चोदनायाः ॥ त्रिपाद्यां तु अर्थवाद
मंत्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यानां संदिग्धनिर्णये प्रामाण्य
मुक्तं । एवं समस्तेनाध्यायेन धर्मप्रमाणनिरूपणात् कथं लक्षणको धर्म इत्ययमं
शो विचारितः । तद्विचारादेव तत्प्रमेयस्य ज्योतिष्टोमादेर्धर्मत्वावधारणात् को धर्म मा॰ २५
इत्ययमप्यंशो विचारितो भवति । वेदादिप्रमेयो धर्म इत्येतावत्येवगतेऽपि न धर्मस्वरू
पं कार्त्स्न्येनावगतं भवति । भेदलक्षणेन हि यं तद्धर्मस्वरूपाणां त्यवधारणान्नि राम
म रवशेषस्वरूपावगतिसिद्धिः । अतो भेदलक्षणमप्येको धर्म इत्यस्मिन्नंशेऽन्तर्गतं । १

कान्यस्यसाधनानीतितुशेषलक्षणादौविचारयिष्यते।सर्वंच भेदाभेदशेषशेष्यादिप्र
माणबलेननिरूपणीयमितिप्रमाणलक्षणस्यआदौरंभः।ननुवेदार्थस्यैवेहभेदाभे
दादिशास्त्रेचिंत्यते·तत्रनुवेदप्रामाण्यमेवोपयुज्यते·स्मृत्यादिप्रामाण्यस्यतुनतदु
पयोगंपश्यामः।मैवं।धर्मस्यैवभेदाभेदादिविचारःशास्त्रेकरिष्यतेश्रौतस्यस्मार्तस्य
वानश्रौतस्यैव।अष्टकादिषुविशब्दांतरादिलक्षणस्यभेदस्यश्रुत्यादिलक्षणस्यचशेष
शेषिभावस्यप्रयुक्त्यादेश्चतुल्यत्वात्।अपिचाहस्यैवशास्त्रेस्मृत्याचारगम्यधर्मवि
चारःप्रदेशेषुकरिष्यते।द्रव्यार्जननियमःक्रत्वर्थःपुरुषार्थइति।तथाप्रजापतिव्रता
तथार नितस्मिंस्तुशिष्यमाणानिजननेनप्रवर्तेरन्·अपिवावेदतुल्यत्वादुपायेनप्रव
र्तेरन्।आचारात्तुगृह्यमाणेषुच।तथास्यादित्यादिभिः।तस्मादिमेइहैवशास्त्रेविच

अथातोधर्मजिज्ञासासूत्रभाष्यमिदं समाप्तं॥

मां प्रवर्तनं व

योनवेदार्थ इति। तथा च दर्शितं। धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनं इति। तथा अथा
तोधर्मजिज्ञासा चोदनालक्षणोऽर्थो धर्म इति च सूत्रे को धर्मः कथंलक्षण इत्यादि भाष्येन कु व
कविवृत्तिरिव वेदार्थपरं व्याख्यानं ×थी× अतो धर्मप्रमाणहेतुस्वरूपादिनिरूपणेनानुपयोगी
सर्वस्य प्रमा णाधीनत्वेपि ति सिद्धान्तं तत्र भेदपूर्वकलाछेषलक्षणादेः प्रथमं तावद्भेदलक्षणमारभ्यते शब्दान्तरादिभिः
तत्र शब्दान्तराऽभ्यासे नामधेयगुणप्रकरणान्युत्पत्तिपरतां विधेर्बोधयंति संति उत्पन्नस्योप
सयोगाद् स्य भावाद्वाक्यान्तरविहिता कर्मणः स्ववाक्यविषयस्य भेदं बोधयंति। संख्या तेषामेवान्य
तेमेनोत्पत्तिपरत्वे विधेः स्वगतेसति अन्ये कोत्पत्तिपरतां बोधयंती स्ववाक्यविधेयानामेव
कर्मणां मिथो भेदमावहतीति विदितव्यं। तदिह धात्वर्थभावनापूर्वाणां त्रपालामपि रा म
भेदः प्रतिपादयिष्यते। तत्रापूर्वस्याशब्दार्थत्वात् स्वरूपेण भेदनिरूपणाशक्तेर्भावना २

भेदानुनिष्पादी भेदः। तद्भेदश्च करणीभूतधात्वर्थभेदद्वारेण वक्ष्यते। तच्च धात्वर्थ
स्य करणत्वे सति वक्तुं शक्यते नान्यथेति प्रसक्ते तद्धात्वर्थभेदानुनिष्पाद्यपूर्वभेदानु
सारसिद्ध्यर्थमाद्यमधिकरणमुपोद्घातत्वेनाध्यायस्यारभ्यते। किमिहोदाहरणं।
श्येनेनाभिचरन्यजेत। चित्रया यजेत पशुकामः। सोमेन यजेत। हिरण्यमात्रेयाय ददा
ति। हिरण्यं भार्यं। समिधो यजति। दशापवित्रेण ग्रहं संमार्ष्टि। यस्य न माहिष्या द्युतं स
तनिर्हरेरन्नाग्नीध्रे [illegible] जुहुयाद्दश होतारं चतुर्गृहीतेनाज्येन यः कामयेत वी
रोस्म आजायेतेति स चतुर्होतारं जुहुयादित्यादि यावत्किंचिद्दृष्टार्थं विधानं
क्रत्वर्थं पुरुषार्थं काम्यं नैमित्तिकं वा द्रव्योपपदं नामोपपदं गुणोपपदं वा तत्स
र्वमुदाहरणं। केचित्तु अधिकारचोदना एवोदाहरणं। तास्तु च सर्वास्तु वि

रूढत्रिकद्वयापत्त्या नामैवोपपदं॥ अतो नामोपपदान्येवोदाहरणमित्याहुः। तदयुक्तं
ता तथा हि। यद्यपि वैदधिकारचोदना ऽवोदाहरणं। तथापि न तासु सर्वासु नामैवोपप
दं। यदेव हि यौगिकवाक्यभेदत्तत्प्रख्यतव्यपदेशा युक्तं तदेव नामधेयं। इतरत्तु
अधिकारावगतमपि गुणार्थमेवापेक्षा॥ यः कामयेत वीरोमत्र्याजायेतेति स चतु
र्होतारं जुहुयादिति चतुर्होतृशब्दो मंत्रवचनो न नामधेयं। तथा यं द्विष्यात्तं
तं संततिहोमैरन्नाग्नीध्रे जुहुयाद्वत्सं तु गृहीतेनाज्येनेति नैमित्तिकाधिकारगतम
प्युपदं न नामधेयं। न च विरुद्धत्रिकद्वयापत्तिः। मत्वर्थलक्षणया विशिष्टविधि संभ
वात्। आवरं च मत्वर्थलक्षणा अप्रसिद्धार्थकल्पनात्। तथा हि सोमेन यजेतेत्यपि राम
सोमपदं नामस्यात् उत्पत्तिवाक्ये पि गुणपक्षे लक्षणास्तीति व्यासाधिकरणे स्व २

उत्पत्तिवाक्ये

यथैवनिबंधनकारेणोक्तं यागविधानेचेत्यादिना । पुमंश्चैतन्न । तथाहि । तत्रापि विहितयद्य
प्यप्रथममपूर्वोत्तरमप्रतिपन्नं तथापि प्रत्ययेन तावन्नदेवाभिधीयते· तत्करणं च या
गइति दोषसाम्यान्नामधेयं स्यात्· नचैवमिष्टापि चासौ यं चरुं निर्वपेत् ब्रह्मव
र्चसकामः वायव्यं श्वेतमालभेतेत्यधिकारचोदनेयं । अत्र चरुं श्वेतमिति द्रव्यगुण
शब्दो सौर्यादिपदं भावार्थं नियोगविषयं इति निबंधनकारः शब्दानुबंधवादी
मन्यते· तेन तदप्यत्रोदाहरणं भावार्थपुरुषाधिकारचोदनात्वात् । तथा· हिरण्यमा
क्या र्यमित्यक्रत्वर्थत्वात् विश्वजिदादिवदुदाहरणं । अत्र चरुं श्वेतहिरण्यशब्दः द्र
व्यगुणवचनाः न नामधेयं । एतानामपपदान्येवोदाहरणमित्यपुरुषमेतन्न । भाष्य
विरुद्धं च । भाष्यकारो हि भावार्थाधिकरणस्य प्रयोजनमभिदधानः सिद्धांते श्वेतद्र

व्यापचारे प्रतिनिध्युपादानं प्रयोजनमाहानामधेये हि कस्य प्रतिनिधिः स्यात्। नन्वा
वश्यमधिकारचोदनाएवोदाहरणं। सोमेन यजेत हिरण्यमात्रेयाय ददातीत्यादि
ष्वपि कुतोऽपूर्वमितिविचारसंभवात्। यद्यपि तेषु तावत्प्रधानापूर्वानुवादशंकया न
प्रथममपूर्वांतरं प्रतीयते तथापि पश्चादपि तावत्प्रतीयमानं किंविषयं प्रत्येतुं न्या
य्यमिति संभवति चिंता। ननु तत्पश्चात्कारकविशिष्टस्य कर्मणो ग्राहकगृहीतस्या
वांतरव्यापारत्वेन कल्प्यमानं भावार्थविषयत्वेनैव निर्णीतमिति न विचारावसरः।
स्यादेवं यदि कर्मैव ग्राहकेण गृह्यत इति प्रागस्मादधिकरणात्सिद्धं स्यात्। ननु त
त्सिद्धं। अत्रैव ह्येतद्विचार्यते। किं सर्वाणि पदानि क्रियाकारकसंबंधानादरे
णापूर्वस्य विषयी भवंति उत क्रियाकारकसंबंधापरित्यागेनेतरपदविशेषिते

राम

मेकमेव पदं यदाप्येकं तदापि द्रव्यादि पदं भावार्थविशेषितं विपरीतं वेति तत्र क्रिया
कारकसंबंधावगमात् त्यागापि द्रव्यगुणयोर्भावार्थकारकत्वेन श्रवणादन्योन्यादकस्व
भावत्वाच्च भावार्थादेवापूर्वमिति स्थिते चास्मिन् क्रियाकारकसंबंधापरित्यागन्या
येग्राहकग्रहणमपि भावार्थस्यैव भवति तस्यान्योन्यादकस्वभावत्वात् कारक त४
त्वाच्च द्रव्यगुणयोः अतश्चापूर्वमपि ततएव स्यात् असति तु तस्मिन्न्याये हि शब्दपद
दातिप्रसिद्धः संबंधानादरेण ग्राहकेण गृह्येयातां दानोपसर्जनं वा हिरण्यं त
तश्चापूर्वमपि पश्चात् कल्प्यमानमुभयविषयं हिरण्यविषयं वा स्यात् तस्मात्तत्रा
पि भावार्थविषयत्वमपूर्वस्यैतदधिकरणाधीनमिति युक्तमुदाहरणत्वं तस्या
दहष्टार्थं सर्वमत्रोदाहरणात् न संशयः। किं सर्वाणि पदानि प्रत्येकमपूर्वं प्रतिपा

दयंति॰ उतैकमिति। तदर्थमिदं विचार्यते किं सर्वेषामर्थाः फलभावनायां करणं उतैकस्यै
5 वकरणत्वमिति। सर्वे च तदर्था इति। पक्षे फलसाधनं ततो पूर्वं कल्प्यते अतो यस्तस्य वाच
कस्तेनापूर्वं प्रतिपादितं भवतीति। ततश्च सर्वेषां फलसाधनत्वे सर्वेभ्यो पूर्वं॰ १ क
स्यतु साधनत्वे तत एवापूर्वमिति। तत्र॰ प्रधानसंबंधलाभात् अवैरूप्याच्च सर्वेषां
फलेन संबंधः। अन्यथा हि यत्फलसाधनं तस्य फलं प्रति उपादानविधानगुणभा
वात्॰ इतरेषां तु प्रतिउद्देशानुवादप्राधान्याद्वैरूप्यं॰ मत्वर्थलक्षणा वा स्यात्। तस्मात्सर्वे
षां फलसंबंध इति प्राप्तेऽभिधीयते। अपूर्वस्य तावददृष्टत्वादेककल्पनयैवोपप
पन्नेवाक्येनानेककल्पनमुपपत्तिमत्। तस्मादेकमेव फलसाधनं॰ इतरेषां तु तदर्थ राम
मिति। न च वैरूप्यं श्येनादीनां नामत्वसंभवात्। सोमादिषु मत्वर्थलक्षणाश्रयणात्। ५

वरं चादृष्टकल्पनातो लक्षणा। तस्मादेकमपूर्वं॥ यद्येवं तदा संदेहः किं भावश-
ब्देभ्य उत द्रव्यगुणशब्देभ्य इति। तदर्थं च किं भावार्थाः फलेन संबध्यन्ते किं वा द्रव्यगुण-
शब्दार्था इति॥ ननु अनियमेन यत्किंचिदेव तु न त्ववश्यं नियन्तव्यं उच्यते। नानि-
यमो वाक्येन बोधयितुं शक्यते। तस्यैकरूपत्वाद्वार्थः। न हि तत्कदाचिद्यागस्य फल-
त्वं इतरस्य च तादर्थ्यं प्रतिपादयति कदाचिच्च विपर्ययं वाचनव्यक्तिभेदात्। तस्मा-
देकरूपत्वाद्वाक्यार्थः स किंरूप इति चिन्तयितव्यं। तत्र अनध्यवसाय एव केचि-
त्पूर्वपक्षमाहुः। तदयुक्तं। तथा स्यादप्रमाणमेव स्यात्। तत्त्वायुक्तं। तदा हि प्रमाण-
लक्षण एवायं विचारः स्यात्। न हि हासिद्धवाक्यप्रामाण्यस्य। ननु पक्षद्वयेपि
अनुष्ठानस्यैकरूपत्वेनाध्यवसितत्वात् नाप्रामाण्यं। मूर्खप्रलपितमेतत्। यदि

6 पक्षद्वयेपिनकश्चिदनुष्ठानेविशेषः किमर्थमधिकरणं।अपिच·पूर्वपक्षेश्येनादीनां
गुणविधित्वात्श्येनद्रव्येणैष्टव्यं।सिद्धांतेतुनामधेयत्वात्सोमेनयष्टव्यमित्यस्ति
विशेषः।यदाहभाष्यकारः स्थितएतस्मिन्नधिकरणेगुणविधिर्नामधेयमितिवि
चारइति।यत्तु·नसिद्धांतेपिनामधेयं·यथासोमेनयजेतेति।तत्र·प्रतिनिधिसदस
द्भावः प्रयोजनं।तदप्याहभाष्यकारः।यदिद्रव्यगुणशब्दाःअपूर्वंचोदयंतिद्रव्यगु
णापचारेणप्रतिनिधिरुपादातव्यो यथापूर्वः पक्षः।यथातर्हिसिद्धांतः द्रव्यंगुणंवा
प्रतिनिधायप्रयोगोनुष्ठातव्यइति।तस्मात्प्रसज्यतएवाप्रामाण्यमितिमैवंपूर्वःपक्षः।
किंतुद्रव्यादिभ्यो पूर्वं·तएवफलसाधनमिति।कुतः।फलंहिसाध्यमानत्वात्सिद्धं राम
साधनमिच्छति।द्रव्यादिचतथायागःस्वयंसाध्योनसाधनं।।१।।श्येनेनाभिचरन्

जतेत्पादोफलं·सन्निधोयजतीयादोचफलवदुपकारःसाध्यरूपत्वात्सिद्धरूपंसा
धनमपेक्षते·नसाध्यांतरंद्रव्यगुणोचसिद्धरूपत्वात्तदाकांक्षांपूरयितुंसमर्थौ।
यागादयस्तुस्वयमेवसाध्यत्वात्नसाधनत्वयोग्याः।तस्मात्द्रव्यादिभ्यःफलं।
यत्तु·भाष्यकारेणविशेषणोक्तंतच्छब्देतोविशेषोनवगम्यात्वस्तुस्वभावेनद्रव्यादि
भ्योदृवफलंयुक्तमेतदभिप्रायं।तस्मात्द्रव्याद्येवफलभावेनायाःकरणमितिप्राप्त
अभिधीयते॥भावनैवहिभाव्येनफलेनान्वेतुमर्हति।धात्वर्थःकरणंतस्यातादृवा
त्संनिकर्षात्॥१॥फलमपिकारकंकरणमपि·नहिकारकौमिथःसंबध्यंते·किं ति
तुक्रियया·साचेहप्रत्ययवाच्याफलभावना·तेनतयैवफलंसंबध्यते·तद्द्वारेणै
वकरणस्यफलसंबंधः।तस्याश्चधात्वर्थस्यैवकरणत्वंयुक्तं·कल्पनालाघवात्।

तस्मिन्हि फलवत्सपूर्वसाधने कल्पिते द्व्यादेस्तन्निर्वृत्तिर्दृष्टमेव प्रयोजनं। द्व्या
दिप्रसक्तरूपपूर्वे कल्प्यमाने धात्वर्थोऽसिद्धरूपः सिद्धरूपस्य द्व्यादेर्न दृष्ट
मुपकारं शक्नोति कर्त्तुमिति ततोप्यपरमदृष्टं कल्पनीयं संनिकृष्टं प्रकृत्युपात्तो श्री ३
धात्वर्थः प्रत्ययवाच्यया भावनया पदश्रुत्या संबध्यते। द्व्यादिनु पदान्तरश्रोपा
त्तं वाक्येन। श्रुतिश्च वाक्याद्बलीयसी। साध्यरूपोपि धात्वर्थः स्वसाधननिष्पादितः
सन्न् शक्नोति फलं साधयितुं तस्मात्स एव भावनायाः कारणं। का पुनरियं धात्वर्था
तिरेकिणी भावना नाम। यस्यां धात्वर्थः करणं। कर्त्तृव्यापार इति चेत्। नन्वऽसौ प्रत्या
वधिश्रयणादिः। यजौ च मानसस्त्यागः तद्धेतुर्वा प्रयत्नः संकल्पो वा। गतो चलनं। ते
चाधिश्रयणत्यागसंकल्पचलनोदयो धात्वन्तरार्था एवेति न धात्वर्थातिरेकिणी भाव राम

नामुपलभ्यमहोप्रयत्नो भावनेतिचेत्·रथो गच्छतीत्यत्र तदभावप्रसंगः।स्पंद इतिचेत्·
यजतीत्येवमादिष्वात्मकर्तृकेषु व्यभिचारः।उभयसाधारणमुदासीनत्वविच्छे
दसामान्यं भावनेतिचेत्·शब्दादिष्वभावप्रसंगः।नहिशब्दस्य विभोरचेतनस्यस्पं
दः प्रयत्नो वास्ति।तत्र·अभिधाभावनामाकुरन्यामेव लिङादयं।अर्थात्मभावना
त्वन्यासर्वाख्यातेषु गम्यते·इत्यादि विरोधः।तस्माद्वक्तव्यं भावनारूपं।किमत्रवक्त
व्यं।उक्तं ह्येतदाचार्यैः।धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते।तथापि सर्वसामान्य
रूपेणान्यावगम्यते॥१॥ विवृतं चैतन्मंडनेनाकथ्यमानाद्रूपभेदात्तद्विधाधात्वर्थसं
गतिः।अन्योत्पादनानुकूलात्माभावनाकिं प्रदुष्यतीति।एतदुक्तं भवति।सत्यं·नधात्व
र्थादत्यंतातिरेकिणी भावना·धात्वर्थानामेवतु द्वेरूपे।एको यागः प्रयत्नः संकल्पः

चलनं विक्लेदनं अभिधानं छेदनं इति प्रातिस्विकं धात्वभिधेयमेकमक्रियात्मकं सिद्ध
स्वभावरूपं। अपरं तु सर्वधात्वर्थानुयायि करोतिप्रत्ययवेद्यं क्रियात्मकं साध्यस्व
भावमन्योत्पादानुकूलमाख्यातप्रत्ययाभिधेयं। तथाहि। यः स्पंदते यो यजते प्रयतते
चलति अभिदधाति। ते सर्वे करोतीति प्रत्ययमनुभवंति भिन्नेष्वपि हि धात्वर्थेषु तात
४ द्रूप्यमुत्पाद्यवस्त्वंतरकर्मकमेव सर्वदा प्रतीयते। तदेव च भवितुः प्रयोजकव्यापा
रत्वाद्भावनेत्युच्यते। तच्चाख्यातेष्ववगमात् तदभावे पाकादावनवगमात् आख्या
ताभिधेयमाश्रीयते। येपि प्रयत्नं भावनामाहुः ये च स्पंदं ये चोभयं तेपि न स्वरूपेण
तेषां भावनात्वमाहुः। किंतु अन्योत्पादानुकूलत्वं रूपं तच्च सर्वधात्वर्थानामस्तीति राम
सर्वव्याप्येव भावनारूपमंगीकर्त्तव्यं। तस्मिंश्च क्रियारूपे प्रकृत्युपात्तो यागादिः कदा

त्विकर्मत्वेनसंबध्यते· यागंकरोतिपाकंकरोतीति· कदाचित्करणत्वेनयागेनस्वर्गंक
रोतिपाकेनौदनमितियथाविवक्षंतद्यदायागादेः कर्मत्वेनसंगतिः तदात्तद्धेतुभूतः प्र
यत्नः संकल्पादिर्वाधात्वंतराभिधेयोपियजतीत्यत्रपदेयागकृतिरित्येवंरूपेणाख्याताभिधेय
तांभजते। संकल्पादिकंतुविशेषरूपंधात्वंतराभिधेयंप्रमाणांतरवेद्यंनाख्यातेनस्पृश्य
ते। यदातुविधिवशात्करणत्वेनयागस्यसंगतिः· कर्मत्वंतुस्वर्गादेः दर्शपूर्णमासाख्य
यागेनस्वर्गंकुर्यादितितदानयागहेतुभूतैवकृतिराख्यातेनोच्यते· यागस्यकर्मत्वा
भावात्· फलस्यैवकर्मत्वात्तत्कर्मिकाकृतिराख्यातेनोच्यते· यागस्तुकरणं। अतोय
दवस्थोयागः स्वर्गंसंपादयतितदवस्थोयागोयेनव्यापारेणसंपद्यतेसव्यापारः
स्वर्गकृतिरित्येवंरूपेणाख्याताभिधेयोभवति। तस्यापिव्यापारस्यरूपंप्रमाणांतरवे

ध्यं नाख्यातेन स्पृश्यते। यागेन स्वर्गं कुर्यादित्यनेन ह्येतावदवगम्यते॰ यथा यागात्स्वर्गो
भवति तथा यागे व्याप्रियेतेति। तत्र कथं व्यापरितव्यं कोसौ व्यापार इति व्यापारविशेषात्म
ककथंभावापेक्षायां मग्न्यन्वाधानप्रयाजावघातादिभिरुपकारसंपादनं शास्त्रांतरै
रवगम्यते। यागस्वरूपस्य प्रयत्नादिना संपादनमर्थापत्त्या। न ह्यनिष्पादितस्य कर
णत्वमुपपद्यते। तेन तच्च स्वरूपसंपादनं प्रयाजादिभिश्चोपकारसंपादनमिति स
रू कलो व्यापारः स्वर्गोत्पत्तिरित्यनेनाकारेणाख्यातशब्देनाभिधीयते। विशेषरूपं प्रयाजा तु
दिशास्त्रांतरैरवगम्यते। तेन सकलोयं प्रयाजादिव्यापारः फलभावनाया एव प्रपंचः। तेन
च व्यापारेण फलसाधनात्मना संपद्यमानो यागः करणं। एतदेव हि करणानां करण राम
त्वं यदुत फलोद्देशेन प्रवर्त्तकर्तृव्यापारेण फलसाधनात्मना संपत्तिः परशोरिवोद्यम १

नन्निपतनाभ्यां द्वेधीभावसाधनतया। तस्मिन् द्वेधा वैतिरिक्ता भावना। ननु एवं धात्वर्थ धा० १
सामान्यमेव भावनास्यात्· नेति ब्रूमः। विलक्षणा वा प्रतिधात्वर्थं। अन्यद्धि पाकस्योदनं प्र
त्यानुकूल्यं· अन्यच्च ज्वलनादेः संयोगादि प्रति। फलभेदात्। एकात्मकत्वे हि तद्रूपस्य फल
भेदो न स्यात्। भिन्नेषु तेषु रूपेषु फलभावनात्वसामान्यमनुवर्त्तते यागादिष्विव करणत्व
सामान्यं। अयं चापरो विशेषः यतो धातोर्यज्यादिकात् प्रत्यय उत्पन्नस्ततो धात्वर्थान्त
रं संकल्पादिकं तत्कृतिरूपेण प्रत्ययेनोच्यते· न यजिरेव। स नु कामं धात्वन्तरेणोच्य
तां इह तावदेकांततः प्रत्ययार्थः। यजिस्तत्र कर्म वा करणं वा। तथा संकल्पयतीत्य
त्र संकल्पादर्थान्तरमेव भावना· संकल्पस्तत्र कर्म वा करणं वा। तेन यतो धातोः प्रत्यय
उत्पन्नस्तदर्थव्यतिरिक्तैव भावना तत्कर्मिका वा तत्करणिका वा तत्कृतेन प्रत्ययेनोच्य

ते॰ ननु तस्यैव रूपांतरमिति न धात्वर्थसामान्यं भावनेत्युच्यते। धात्वंतरेण तस्याभिधा
नं नानिष्टं। यथा स्पंदनस्य तत्र यत्नस्य वा द्वयोर्वा भावना स्पंदादिधातुवाच्यत्वं
तस्मात्सिद्धं धात्वर्थातिरिक्तं भावनारूपं। तत्र धात्वर्थः करणं यच्च करणं ततोऽपूर्वं प्रक
ल्प्यत इति भावशब्देभ्योऽपूर्वं॥ चोदना पुनरारंभः॥ ॥दर्शपूर्णमासाभ्यां स्वर्ग
कामो यजेत॰ श्येनेनाभिचरन्यजेतेत्येवमादिषु अपूर्वं सिद्धं कृत्वा तत्प्रतिपादकशब्दविशेषो
विचा रितः। तस्य तत्सिद्धमेवासिद्धमिति तत्प्रतिपादनार्थमारभ्यते। किमेतेष्वपूर्वं नाम यागस्वर्गातिरिक्तमस्ति नेति विचारः। तदर्थं च किं वाक्यावगतस्वर्गयागादिसाध्यसाधनभा
वोऽपूर्वमंतरेणापि घटते न वेति। तत्र साध्यसाधनभावो हि श्रूयते स्वर्गयागयोः वस्त्वं
तरस्य सद्भावे प्रमाणं नास्ति॥१॥ वस्त्वंतरं हि कल्प्यमानं यागस्य साध्यं स्वर्गस्य च साधनं कल्प्य
रेवविरुध्यते१ सू॰ १०

तातज्योमयमपिश्रुतिविरुद्धं।स्वर्गयागयोरेवसाध्यसाधनभावश्रवणात्।कथंपुनः
क्षणिकस्ययागस्यविनाऽपूर्वेणकालांतरभाविफलसाधनत्वमितियदिब्रूयात्·प्रतिब्रूया
देनं·अपूर्वेपिकल्पितेकथंयागस्यफलसाधनत्वंतदाहिअपूर्वमेवफलसाधनंस्यान्न
यागः।यागस्यैवशक्तिरवांतरव्यापारोवापूर्वंनवस्त्वंतरमितिचेत्।न।शक्तिमतिव्यापारव
वानीतेशक्तिव्यापारयोरवस्थानायोगात्।तस्मात्यागएवविनष्टोपिफलंसाधयति
सएववाफलसाधनंयावद्भवतिएतदितिशास्त्रप्रामाण्यादवगंतव्यं·नापूर्वमितिप्राप्ते
ब्रूमः।विनष्टस्यासतस्तावन्नकार्यारंभसंभवः।क्षणिकत्वेनसिद्धस्यनावस्थानंच
युक्तिमत्।।१।।तदेवहिश्रुतार्थानुपपत्त्याकल्पयितव्यं·नयत्प्रमाणांतरेणविरुध्यते।वि
रुद्धंचसर्वप्रमाणैर्विनष्टस्यासतोऽनारब्धवस्त्वंतरस्यकार्यारंभकत्वं।अवस्थानंच

क्षणमात्रवर्त्तिनः प्रमाणविरुद्धमेव। अतोऽपूर्वमेव कल्पनीयं। न चाश्रुतिविरोधः। तस्य याग
शक्तित्वादवान्तरव्यापारत्वाद्वा। न हि शक्त्याऽवान्तरव्यापारेण वा व्यवधिरकारणतामापाद
यति। काष्ठानामिव ज्वालया। न चावश्यं शक्तिमत्येव शक्त्यावस्थातव्यं। कार्यानुमेया हि सा
यत्रैव कार्योपालं। तत्रैव कल्प्यते। अतो यागशक्तिरप्यात्मन्येव तिष्ठतीत्यविरोधः। एतदेव
चावान्तरव्यापाराणां व्यापारत्वं यत्समीहितोद्देशप्रवर्त्तनेन साधनेन तत्सिध्यर्थमन्तरा सा
ध्यमानत्वं। काष्ठैरिव ज्वालायाः। तस्मादस्य पूर्वं फलसाधनस्य कर्मणोऽवान्तरव्यापार
रूपमङ्गानां च फलवदुपकारसाधनानां। एषात्र प्रक्रिया। प्रथमं तावत्फलवाक्येन क
र्मणः फलसाधनत्वं बोध्यते। यागेन स्वर्गं कुर्यादिति। कथं विनश्वरेण फलं कर्त्तव्यमि रूप
त्यपेक्षायामपूर्वं कृत्वेत्युच्यते। कथमपूर्वं क्रियत इत्यपेक्षायामङ्गानुष्ठानप्रकारेण

तिा ततः पूर्वापरकालवर्त्तिभिरंगव्यापारैर्विषयीकृतस्य यागस्यापूर्वसाधनत्वं नस्वरू
पेणसंभवतीत्यऽपूर्वांतरमपिकल्प्यते। दर्शपूर्णमासयोस्तु पक्षद्वयवर्त्तिभ्यां समुदा
याभ्यां युगपत्फलापूर्वारंभायोगात् एकैकं प्रतिसमुदायमपूर्वं कल्प्यते। तत्राप्यंगभावा
पेक्षायामग्न्याधानाद्यंगोपदेशः। ततः पूर्ववदेवांगसहितेभ्यः तदुत्पत्तिर्नस्वरूपेण
संभवतीति प्रतित्रिकं त्रीणि त्रीण्युत्पत्त्यपूर्वाणि कल्प्यंते। यदि पुनः प्रथममेव षड्भ्यो यागे
भ्यः षडपूर्वाणि कल्प्येरन्· ततो पूर्वार्थत्वादंगानामंगोपकृतेभ्योऽपूर्वसिद्धौ पुनरपि षडु
त्पत्त्यपूर्वाणि कल्प्यानि स्युरिति गौरवं स्यात्। तस्मादेकमेव फलापूर्वं उत्पत्त्यपूर्वाणि तु प्र
तिप्रधानं भिद्यंते। तथांगान्यपि कानिचित्प्रकारत्वेन स्वीकृतानि स[illegible]णि केवलान्न स्वरूपेणासंहत्यो
पकर्तुं शक्नुवंतीत्यवांतरव्यापाररूपाणि तावदपूर्वाण्यारभंते· ततः सर्वाणि संहत्य प्र

धानस्यसामर्थ्योद्बोधनं फलारंभोन्मुखस्वरूपमनुग्रहंपरमोपकारंजनयंति।तत्र स्वयं विभा
गः।संनिपत्योपकारकापि द्रव्यदेवतासंस्कारद्वारेण यागस्वरूपस्यैवशक्त्यतिशयमाद
धानानि तदुत्पत्त्यपूर्वनिष्पत्तौव्याप्रियंते॰तद्वारेणफलापूर्वोत्पादुपकारकाणिनुसाक्षा
द्देवोत्पत्त्यपूर्वेभ्यः फलापूर्वनिष्पत्तौ।एवंप्रकारकभेदसत्त्वेपिसर्वाण्यंगानिपागापूर्वनिष्प
त्तौअनुग्राहकाणिभवंतीत्येवमेकरूपेणस्वभावेनस्वीक्रियंते।तस्माददस्सपूर्वं॥ ॥ता
नि द्वेधं गुणप्रधानभूतानि॥ ॥एवंतावददस्सपूर्वं॰तच्चाख्यातेभ्यः तदर्थंचद्व्यादिपदं।
आख्यातंतु द्व्याद्यपेक्षयाप्रधानस्यकर्मणोवाचकमित्याख्यातभेदानुसार्यपूर्वभेदानुस
रणंकर्त्तव्यमितिस्थितं।तस्यापवादः क्रियते।सत्यपिधात्वर्थभावनयोर्भेदे केषुचिदा
ख्यातेषुनापूर्वंभिद्यतइति।दर्शपूर्णमासयोर्व्रीहीनवहंति॰तंदुलान्पिनष्टि॰इतिश्रूयते।

तत्र संशयः। किमवघातादिभ्योऽपूर्वमस्ति नेति। तदर्थं च किं अवघातार्था व्रीहयः उत व्रीह्यर्थोऽव
घात इति। तत्र वाक्यसाफल्याय अवश्यं कल्प्यमदृष्टं· तच्च धात्वर्थादेव साध्यभूतात् न्याय्यं। तत्
था हि भूतस्य द्रव्यस्य तन्निर्वृत्त्यादृष्टार्थतास्यादिति· अन्यथा नु अदृष्टद्वयं कल्प्यमित्युक्तेऽपू
र्वाधिकरणे। तस्माद्व्रीह्यपेक्षयावघातः प्रधानमेव। ततश्चापूर्वमिति। स्यादेवं यद्यदृष्टं कल्प्येत
व्रीहीणां।५ अत्र पुनः क्लृप्तमेव यागनिर्वृत्तिः प्रयोजनं· तादर्थ्याच्चावघातस्यापि कर्मौपयिकं तुषविमो
कादि दृष्टमेव प्रयोजनं लभ्यत इति न कस्यचिददृष्टं कल्प्यं। नियमादृष्टमात्रं तु कल्पनी
यं। तच्चावघातस्यादृष्टार्थत्वेऽपि द्रव्यनियमादवश्यं कल्प्यमिति अदृष्टद्वयं। तद्वरमेकमेव
दृष्टार्थादवघातान्नियमादृष्टं कल्पितं॥ ॥धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्र[illegible]याजव
त्॥ यत्र न किंचिद्दृष्टमस्ति· कर्मौपयिकं तु द्दित्तापयासे युज्यनिर्दिश्यते स्रुचः संमार्ष्टीत्यादि
दृष्टं

तत्र विचार्यते॰ किं प्रधानकर्म उत गुणकर्मेति। तदर्थं च किं साध्यवाचिनी द्वितीया ऽथवा
साधनवाचिनीति। यद्यपि चात्र सिद्धान्ते पि द्रव्यगता ऽदृष्टसंस्काररूपा ऽपूर्वसद्भावान्ना
पूर्वभेदाभेदयोरुपयोगः॰ तथापि पूर्वोक्तगुणकर्मलक्षणस्याव्यापकत्वं प्रधानकर्मलक्ष
णस्यातिव्याप्तिं चाशंक्य समाधीयत इति संगतिः। तथा हि॰ येस्तु द्रव्यं चिकीर्ष्यत इति दृष्टो
पकारि हि गुणकर्मलक्षणमुक्तं तच्चाव्यापकं॰ संमार्जनादिष्वभावात्। तथा॰ येस्तु द्रव्यं न चि
कीर्ष्यत इति दृष्टोपकाराभावः प्राधान्यलक्षणमुक्तं॰ तच्च संमार्जनादिष्वतिप्रसक्तं॰ तेषाम
पि प्राधान्यप्रसंगादिति। तदिदमाशंकाद्वयं निराकर्तुमिदमुच्यते। द्वितीयाश्रुत्या संमार्ज
नादीनामपि द्रव्यगुणत्वां पूर्वोक्तं तु लक्षणद्वयं न गुणप्रधानविषयं॥ अपि तु येत्र पूर्वसद
सद्भावविषयं॰ तन्मात्रस्यैव भावार्थाधिकरणापवादत्वेन प्रतिपिच्छिसितत्वात्। तेनापूर्वसद्भा

राम
१२

13

र्थयतानि द्वैध मिति गुणप्रधानकर्मणीउपक्षिप्तो। कीदृशं तद्गुणकर्म यत्रापूर्वं नास्ति· कीदृ
शं वा प्रधानकर्म यत्रापूर्वं विद्यते· इत्यपेक्षायामुक्तं दृष्टोपकारिषु पूर्वं नास्ति· तदभावे त्वस्ती
ति। संमार्जनादिषु चास्त्येवापूर्वं द्रव्यगतमित्यनवद्यं लक्षणं। अत्र पूर्वपक्षाभिप्रायः। दृष्टप्र
योजनत्वमेव च गुणकर्मत्वलक्षणं· न द्वितीयेति। कुतः। व्यभिचारान्न साध्यत्वमुच्यते लौ
कवैदयोः। साधनत्वं द्वितीयार्थः सर्वत्राव्यभिचारतः। ११। बलाबलात्रूषि खंडकान्कुवि
ति लोके· सक्तूञ्जुहोतीति च वेदे· व्यभिचारान्न साध्यत्वं द्वितीययोच्यते। साधनत्वं तु घ
टं करोतीत्यादावपि घटादीनां बुद्धिस्थत्वेन क्रियाहेतुत्वादस्त्येवेत्यव्यभिचारात् स एव
द्वितीयार्थः। अतः स्रुगादिसाधनकसंमार्गविधानाद्दृष्टोपकाराभावाच्च प्रधानक
र्मैव संमार्जनादीति प्राप्ते ब्रूमः। स्मृता साध्याभिधायित्वं द्वितीयायाः प्रतीयते। कर्तुर्यदी

15

ईप्सितं पश्चात्तथायुक्तमनीप्सितं॥१॥ न कर्मेत द्वितीयार्थ इत्येवं पाणिनेः स्मृतिः। बलीयसी च सा बा
शास्त्रयोगोप्यस्ति तादृशः॥२॥ स्मृतिस्तावदाचाराद्बलीयसीति स्थितं क्रियया संयुज्यते साध्या
रस्मरति च पाणिनिः कर्मणि द्वितीया· कर्तुरीप्सिततमं कर्म· तथायुक्तं चानीप्सितमिति चायथेप्सितेऽ
त्मना· तथासाध्यात्मनैव क्रियया युक्तं चानीप्सितमपि कर्मसंज्ञमितीप्सितानीप्सितानुवर्ति
साध्यरूपं कर्मेत्यर्थः। कर्म च द्वितीयार्थ इति साध्यत्वमेव द्वितीयार्थः। न च निर्मूलं स्मरणं· घ
टं करोति व्रीहीन् वहतीति लोकवेदयोः प्रयोगसद्भावात्। यदि च साधनत्वमर्थः स्यात्·
तर्हि परशुना छिनत्तीति परशोर्द्वितीया स्यात्। साधनविशेषवचनत्वाद यमदोष इति चे
त्· कः पुनरसौ। यस्य साध्यत्वमिति चेत्· तदेव तर्हि वाच्यमस्तु· किं साधनोपलक्षणत्वेन राम
प्रितेन। नन्वेवमपि कथं स्रगादीनां शेषित्वं· ईप्सितं हि शेषि भवति· न चेप्सितं द्वितीयार्थः· कि १४

सीप्सितानीप्सितानुवर्त्तिसाध्यत्वमात्रं।सत्यं·नशोषिवं द्वितीयार्थः·ननुविधेर्लभ्यते·विधि
वशेनहिसमीहितमेवभावनायाभाव्यमधिगतं·तद्विशेषश्चपदांतरात्प्राप्यते·तत्रस्रगा
दीनांद्वितीययाभाव्यत्वमुच्यते·समीहितभाव्यापेक्षिण्यांचभावनायांनाऽसमीहितस्यभा
व्यत्वंसंभवतीतिस्रगादीनांसमीहितत्वसिद्धिः।ननुयत्समीहितंतस्यसाधनंविधिनाबो
ध्यते·ननुतद्वशेनसमीहितत्वं।कोवाआहसमीहितत्वंविधिगम्यमिति·किंतुविधिविष
यीभूतयाक्रिययाईप्सितत्वंस्रगादीनांद्वितीयाप्रतिपादितसाध्यभावानांविधिवशाद्ग
म्यतेइत्युच्यते।स्वरूपेणतुतेषांसमीहितत्वंकेनुसाधनत्वादेवसिद्धं।सक्तूनांतुभूतभाव्यु
पयोगरहितत्वान्नसमीहितत्वमस्तीतिसमीहितसाध्यापेक्षिण्यांभावनायांभाव्यत्वेनान्व
यस्यायोग्यत्वात्साधनत्वमेवलक्षणयाद्वितीयाभिधत्ते।स्रगादीनितुकेनुसाधनरूप

 जन्य५

तेऽस्थितत्वात्योग्यान्वयसमभिहितमात्रापेक्षिण्यासंसर्गभावनयान्वयानुमितिसाध्यत्वमे
वश्रुतिबलेनगृह्यते।तत्रदृष्टोपकाराभावेप्यदृष्टसंस्कारकल्पनात्सिद्धंगुणकर्मत्वं॥ ॥
स्तुतशस्त्रयोस्तुसंस्कारोयाज्यावद्देवताभिधानत्वात्॥ ॥इहस्तोत्रशस्त्रयोरुदाहरणं
आज्यैःस्तुवतइत्यादिप्रगीतमंत्रसाध्यंगुणेनगुणिनःसंबंधाभिधानंस्तवनंस्तोत्रं।
शस्त्रमपिस्तवनमेवाप्रगीतमंत्रसाध्यंप्रउगंशंसतीत्यादि।तानिगुणकर्माणिप्र
धानकर्माणिवेतिविचारः।तदर्थंचकिंदेवतांप्रतिगुणभूतानितत्प्रकाशनार्थानि।किं
वादेवतांप्रतिप्रधानभूतान्यदृष्टार्थानिइति।तत्र।देवतास्मरणंदृष्टमुज्झित्वादृष्ट
कल्पनंनायुक्तंतेनतादर्थ्यात्स्तोत्रादेर्गुणकर्मता।१।गुणगुणिसंबंधेहिकीर्त्यमा
नेगुणिनीदेवताकीर्त्यते।तत्कीर्तनाच्चतत्स्मरणंक्रतूपयोगिदृष्टमेवप्रयोजनंल

राम
२५

१प्रकाशनार्थत्वात् गुणकर्मेति उच्यते।स संदृष्टार्थतायुक्तः श्रुतिश्चेन्न विरुध्यते देवता १
बुद्धिरिति नादृष्टकल्पनावसरः।तस्माद्देवतास्मरणार्थत्वे स्तुतिरूपं विहन्यते।यथाश्रुतस्या
र्थस्य प्रयोजनकल्पनं नश्रुतरूपहानेन स्तुतिश्चात्र कर्तव्यतयाश्रूयते स्तोतिशंसतीति
यदा च मंत्रवाक्यं गुणसंबंधाभिधानपरमेव भवति तदा स्तुतिर्भवति।यदा गुणद्वारेण
गुणिप्रकाशनार्थं तदा न स्तुतिर्भवति।यथा लोके व[illegible]ओकेशांतो देवदत्त इति गुणसंबंध
परत्वे स्तुतिं मन्यंते।यदा त्वेवमुच्यते यो यं वक्रकेशां तं स्तमानयेति न तदा स्तुतिबुद्धि
र्भवति।तेन प्रकाशनार्थत्वे स्तोतिशंसत्योः श्रुत्यैव वाक्यार्थोपपत्तेः।तेन श्रुतिब
लाद् दृष्टार्थत्वमेव।एवं च माहेंद्रग्रहयजिसंनिधावैंद्री स्तुतिरूपपन्ना भवति।इत
रथा हि श्रुतिसमवायिनी देवताविधिशब्देनैव निगमेषु वक्ष्यति माहेंद्रग्रहदेवता
नेंद्रशब्देन शक्यते प्रकाशयितुमिति यथेंद्रः तथैंद्री स्तुतिरुच्यते।मंत्रोतास्याग्निश

४४ स्वार्थहानेन प्रकाशनलक्षणार्थतास्यात् [illegible] लक्षणार्थे त्वे प्रमाणमस्ति।४४

16 शब्दवद्धाऽग्नीषोमो-इंद्रशब्द एव लक्षणयामाहेंद्रं प्रकाशयेत्तात्त्वद्वयमप्पन्याय्यं।तस्मा
त्प्रधानकर्मणीस्तोत्रशास्त्रे॥ ॥विधिमंत्रयोरैकशब्द्यात्॥ ॥प्रासंगिकमिदमधिकरणं॥ कार्थ्यमेर
द्विविधमाख्यातमुक्तं·प्रधानकर्मणांविधायकं गुणकर्मणांचेति।किमेतदेवप्रकारद्वयं·
तो नेसुच्यते·अस्तितुतैयोपिप्रकारोऽभिधायकत्वमितिप्रतिपाद्यते।अत्र·देवांश्चयाभिर्यज
तेददातिच·अग्नीदग्नीन्विहर·बर्हिर्देवसदनंदामिइत्यादीनि·पश्चाद्धाऽमंत्रणात्तमपुरु २५
षादिसंयुक्तान्याख्यातानि·यानिच·यस्योभयंहविरार्त्तिमार्छेदित्यादीनियावन्तिनिमि
त्तादिप्रतिपादनेनाख्यातांतरैरेकवाक्यतांगतानितान्युदाहरणं।तानिचप्रायेणामंत्रेष्वेव
तिमंत्रोपन्यासः।नतुमंत्रवत्स्यकश्चिन्न्यायोपयोगः।तानिचविधायकानिअभिधायकानि राम
वेतिसंशयः।तत्रा विधायकत्वमेतेषामाख्यातत्वाविशेषतः।सत्यपिप्रकृतेकर्मण्यभ्यासात्कर्म १९

मेदधीः॥१॥ अत्रोच्यते। यच्छब्दादिष्विरे तेषां विधिशक्तिर्विहन्यते। न हि याभिर्यजेतेति कथं विधि
संभवः॥१॥ तथा र्दभिगन्धामीति नाम्ना नाम्नाशक्यो विधातुं· आमंत्रणविभक्त्या अग्नीदग्नीन्विह
र इति वक्त्राभिमुखस्य आत्तविषयत्वात्तवेदे च वक्तुरभावात् विधेश्चाभिमुखानभिमुखसर्वपुरु
षसाधारणत्वात् विरुद्धस्वभावेनामंत्रणेन विधिशक्त्यवलोपः। तस्मादेवमादीनां प्रयोग
मध्ये पुरुषांतरेण स्मारयितव्ये सामर्थ्ये न बहिः प्रयोगभाविनि विधावितिसिद्धं अभिधायक
त्वं॥ ॥तच्चोदकेषु मंत्राख्या॥ ॥न्यायानोपपत्तिकेनापि मंत्रशब्देन पूर्वव्यवहृतमिति तत्प्रसंगा
द हेबुध्न्यमंत्रं मे गोपायेत्यादिवेदप्रयुक्तस्य मंत्रशब्दार्थस्य निरूपणार्थं मंत्रलक्षणं क्रियते।
यानि प्रयोगकाले कर्तॄ अनुष्ठानोपयिकार्थाभिधानस्वरूपाणि वाक्यानि तानि मंत्रशब्देनो
च्यंते। प्रायिकमिदं· अभियुक्तप्रसिद्ध्युपलक्षणार्थं· यत्राभियुक्तानां मंत्रप्रसिद्धिः स मंत्र इत्यर्थः॥

17

शेषे ब्राह्मणशब्दः॥ ॥द्विभागस्य वेदस्य मध्ये एकभागस्य मंत्रात्मकस्य लक्षणमुक्तं। तत्प्रसंगात्
एतद्ब्राह्मणान्येव पंच हवींषीति वेदप्रयुक्तस्य ब्राह्मणशब्दस्यार्थपरिज्ञानार्थं ब्राह्मणलक्षणा
भिधानं। अवशिष्टं ब्राह्मणमिति॥ ॥अनाम्नातेषु मंत्रत्वमाम्नातेषु हि विभागः स्यात्॥ ॥ऊहप्रवर
नामधेयानां मंत्रत्वं नवेति संदेहे मंत्रैकवाक्यत्वेन तन्मध्ये निवेशात् मंत्रकार्यकरत्वाच्च मंत्र
त्वप्राप्ते अभिधीयते। मंत्रकार्यकरत्वं तावदर्थबोधादि पुरुषप्रनैकांतिकं। मंत्रैकवाक्यतापि न तत्का
रणं। किंतु अभियुक्तप्रसिद्ध्या हि मंत्रत्वमवकल्प्यते। स्वाध्यायकाले तेषां च समाम्नातेषु मंत्रधीः
मंत्रानध्यापयामोऽद्य तथा मंत्रानधीमहे। समाम्नायबहिर्भूते ऊहादौ नास्ति मंत्रधीः। तस्मा
त् अभियुक्तप्रसिद्ध्यभावादेवामंत्रत्वं॥ ॥तेषामृग्यत्रार्थवशेन पादव्यवस्था॥ वेदभागयोर्मंत्र राम १
ब्राह्मणयोर्लक्षणमुक्तं। तत्र मंत्रभागस्यापरोवांतरविभागः सगादिरूपो वेदे लोके च प्रसिद्धः

अहे बुध्न्य मंत्रं मे गोपाय यमृषयस्त्रयीविदा विदुः। ऋचः सामानि यजूंषीति। तत्र को भागः ऋ-
क्शब्देनोच्यते को वा साम शब्देन को वा यजुःशब्देनेति तत्परिज्ञानाय समृगादिलक्षणमुच्य-
ते। यत्रार्थवशेन पादव्यवस्था सर्गिति॥ गीतिषु सामाख्या॥ यद्यपि प्रगीते मंत्रे सामशब्द
प्रयोगोऽभियुक्तानां तथापि नागृहीतविशेषणेति न्यायात् कवतीषु रथंतरं गायतीत्याद्यति-
देशोपपत्तेश्च गीतिरेव सामेति सप्तमे स्वयमेव सूत्रकारो वक्ष्यति। इह तु विभागमात्रं विवक्षि-
तं तद्यदि प्रगीतो मंत्रः साम यदि वा गीतिमात्रं उभयथाप्यृग्यजुर्भ्यामन्यत्सामेति विभाग
सिद्धेर्न विभागाय प्रयत्यते। सप्तमे तु रथंतरमुत्तरयोर्गायतीत्याद्यतिदेशोपपत्तिकत्वाद्विभागे-
न प्रयोजनमस्तीति तत्रैव वक्ष्यमाणत्वं मंत्रे वा गीतिः सामेत्युक्तं। यत्तु ऋचि भाष्य वार्ति-
कयोर्गीतिवाचित्वं साधितं तद्वक्ष्यमाणमेव प्रसंगादिति द्रष्टव्यं। न सूत्रार्थतया॥ सामासप्तमि

18

कस्यपो नरुक्तयं॥ ॥शेषे यजुःशब्दः॥ऋक्सामाख्यां यदन्यत् प्रश्लिष्टपठितं मंत्रजातं तद्यजुः॥ प

निगदो वा चतुर्थं स्यात् धर्मविशेषात्॥ ॥शेषे यजुःशब्द इत्येतदाक्षेपलक्षणमारभ्यते।संति

निगदानामपरसंबोधनरूपा मंत्राः प्रोक्षणीरासादयेत्येवमादयः· ते किं यजुर्भ्योऽन्ये किंवा

यजूंष्येवेति विचारः।संज्ञाभेदात् इमे निगदा इमानि यजूंषीति· तथा उपांशु यजुषा उच्चैर्निगदेने

ति विप्रतिषिद्धधर्मयोगाच्च भेदप्राप्तावुच्यते॥संज्ञा तावत् नितरां गद्यत इति व्युत्पत्त्या यजुष्ट्वे

वोच्चैर्धर्मयोगाच्च क्रोतिवर्त्तितं।ब्राह्मणोऽपि परिव्राजकसंज्ञेति न तया भेदः।न च धर्मभेद

द्भेदः।सत्यपि यजुष्ट्वे परप्रत्यायनकार्यविरोधेन निगदेषु उपांशुत्वस्याप्राप्तेरर्थवशादुच्चै राम

ष्ट्वसिद्धेः।ननु वाचनिकस्य उपांशुत्वं लौकिकं परसंबोधनं कार्यं· तत्कथं लिंगेन वच १८

नस्य बाधः उच्यते।अंगस्य उपांशुत्वं मंत्रस्य प्रधानं परप्रत्यायनं कार्यं· तद्यद्यपि दुर्बल

तथापिस्वरूपतोबलवत्त्वात्बलवत्प्रमाणकं तथापिस्वरूपतोबलवत्त्वात्बलवत्प्रमाणक
मपिस्वरूपतोदुर्बलं उपांशुत्वं बाधते। प्रमाणबलाबलाद्धि प्रमेयबलाबलं ज्याय इति व
र्णितमेतत्। तानचववचनस्याप्रामाण्यं। यजुरंतरे सावकाशत्वात्। अपि च। अप्राप्तविधाना
न्नियमविधानं लघीयः। तेन यत्रानियमेनोपांशुत्वं प्राप्तं तत्र नियममात्रमुपांशुयजुष्ट्व
ेन न क्रियते। निगदव्यतिरिक्तेषु च यजुष्षु येन केन चित्स्वरेण कार्यसिद्धेरुपांशुत्वस्यानि
यमप्राप्तिरिति तद्विषयमेवेदं वचनं। निगदेषु तु कार्यबलेन उच्चैष्ट्वमेव प्राप्तं न पक्षे
प्युपांशुत्वमिति न तत्रास्य वचनस्य व्यापारः। एवं चार्थतः प्राप्तेरुच्चैर्निगदे नेत्यनुवादः। त
स्माद्यजुष्ट्वेव निगदानमंत्रांतरं। तथा च वेदे अहे बुध्नियमंत्रं मे गोपाय स च। सामानिय
जुंषीति मंत्रशब्दसामानाधिकरण्यं सगादीनामेव त्रयाणां दृश्यते। जात्यंतरत्वे हि निग

19

दशब्दोपि तत्रऋग्रूपेत तस्मात्त्रिधैव मंत्राः॥ ॥अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्।
सग्यजुःसामरूपे मंत्रविभागेभिहितेऽधुना तदवांतरभेदकथयितुं प्रस्तावः। तत्रस
क्सामानां अध्येत्रसिद्धो भेदो न वक्तव्यः। यजुषां तु प्रश्लिष्टपठितानां भेदो न सुज्ञान इ
ति तत्परिज्ञानाय यजुःपरिमाणलक्षणमुच्यते। यावदेकप्रयोजनं विभागे च साकांक्षं
पदजातं तावद्यागसाधनत्वात् यजुः वक्तव्यवाच्य वाक्यं। एतस्माच्च कारणादेकवाक्य
त्वं यत्ततोन्यत् तद्वाक्यांतरं यजुरंतरं चेत्युक्तं भवति। उदाहरणं च॰ देवस्य त्वा सवितुः
प्रसव इति। अत्रापि सर्वाणि पदानि निर्वापप्रकाशार्थानि विभागे च साकांक्षाणि त
स्मादेषामेकयजुष्ट्वं॥ ॥समेषु वाक्यभेदः स्यात्॥ ॥एकप्रयोजनं सर्वं विभज्यमा राम १९
नसाकांक्षं पदजातमेकं यजुरित्युक्तं। अनेन लक्षणेन यत्र कर्मसमवेतार्थप्रकाश

नि कं॰ वे पामीसादिपदमस्तितत्रसुगमं परिमाणं। अथ यत्र समवेतार्थप्रकाशकपदाभावे
न लैंगिकविनियोगाभावे वाचनिको विनियोगः परस्परनैराकांक्ष्यं च स्वरूपेणावग
म्यते यथेषे त्वोर्जे त्वेति· यथा वायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामिति· तत्र कियदे
कं यजुरिति चिंत्यते। किं प्राक् दृष्टार्थमंत्रावधेरेकमंत्रत्वं उत यावदेव मिथः संबद्धमि
मिषे त्वेति तावदेकं यजुः अन्यत्तु यजुरंतरमिति। तदर्थं च किं सर्वमेकार्थमुत भिन्नार्थ
मिति चिंता। तत्र तावत्। अदृष्टार्थत्वमेतेषामनुष्ठेयाप्रकाशनात् तत्त्वैकं तत्र साकां
क्षाः सर्व इत्येकवाक्यता॥१॥ अदृष्टे हि कल्प्यमानमेकमेव युक्तं· तावतैवोपपत्तेः। अ
तः सर्वे तावदेकार्थाः· ते च सर्वेपि सह कल्पितमिति संभूयकारित्वात् विभज्यमानाः साकां
क्षा भवंतीत्येकवाक्यता। निष्क्रिते च मंत्रैकत्वे यद्यपि प्रतीकभेदेनाऽनेकत्र विनियोगः

इषेत्वेतिछिनत्तिऊर्जेत्वेत्यनुमार्ष्टीति· तथापियावद्विनियोगंसकलमावर्त्तिष्यते।उ
च्यते।यद्यप्येषामदृष्टार्थस्तथापिनतदेकता।रूपतोहिनिराकांक्षाभिन्नत्वेनावधारिताः।१।।
अन्योन्यानादरेणैवप्रार्थ्यंतेप्रयोजनंयथापेक्षमतस्तेषांभिन्नादृष्टप्रकल्पना।यथा
विश्वजिदादीनांभेदेनफलकल्पना।यथाचसमिदादीनामपूर्वंभिन्नमिष्यते।।२।।तद्वदत्र
नचात्रैषामदृष्टार्थत्वसंभवः।शाखाछेदप्रकाशेनदृष्टार्थाहिविधेरमी।।४।।इषेत्वेतिछिन
त्तीतिशाखाछेदनेकरणत्वेनमंत्रोविधीयते·क्रियानिर्वर्त्तकंचकरणंभवति।नचमंत्राणां
क्रियानिर्वर्त्तकत्वंअन्यतःप्रकाशनात्।तेनविधिवशादेषांप्रकाशनार्थत्वात्तत्रयाव
ताविनाचोदितस्यप्र×दं×काशनंनभवतितावदध्याहर्त्तव्यं·छिनद्मीत्यादि।तत्रैकेन
छेदनंप्रकाश्यतेऽन्येनत्वनुमार्जनमित्यर्थभेदान्मंत्रभेदः।तथा।आयुर्यज्ञेनकल्पता राम २०

१ ऋतीर्वाचयन्तीति च मंत्र प्रतिबद्धवचनस्याचोदितत्वात् संप्रत्ययप्रमाणुरादि विशिष्ट ४१
मित्र्यादीनामपि स्वरूपतो निराकांक्षत्वात् मंत्रभेदप्रकाशनपरत्वात् अर्थभेदेन म
च भेदः ॥ अनुषंगो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ ॥ अत्रापि यजुः परिमाण
मेव चिंत्यते । यत्र बहूनां वाक्यशेषापेक्षाणां वाक्यानां संनिधावेकस्यानंतरदेशे परिपूरणस
मर्थो वाक्यशेषः श्रूयते । यथा । याते अग्ने ऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधी
त्वेषं वचो अपावधीं स्वाहा । याते अग्ने रजाशया । याते अग्ने हराशयेति । अत्रोत्तरो मंत्रा
कुदाहरणं । किं तयोर्लौकिकः शब्दो ध्याहर्तव्यः उत यो सौ पूर्वमंत्रानंतरं पठितस्तनूर्वर्षि
ष्ठेत्यादिः स एव सर्वेषामर्थनाम्नातः पूर्वस्य चोत्तरयोरप्यनुषंगो न वा शेष इति । अध्याहारे
याते अग्ने रजाशया याते अग्ने हराशयेत्येतावानेव मंत्रः । अध्याहारस्य लौकिकस्याहा
दिवद मंत्रत्वात् । अनुषंगे तु तत्सहित एव मंत्रः इत्यस्ति परिमाणविशेषः । तत्र । एक

वनिबद्धोहिसमाम्नायेनवैदिकः।शेषोन्यत्रननेतव्योलौकिकस्यानिबंधनः।१।लौकिकोहि
शब्दःसर्वार्थोनक्वाचिदेवविशेषेऽनिबद्धः।सयत्रकार्यंतत्रसर्वत्रपठ्येष्टंविनियुज्यमा
नोनविरुध्यते।वैदिकस्तुपदार्थसमाम्नातः तेनैवनिबद्धोनान्यत्रनेतुंशक्यते।नीयमानोवा
समाम्नायबहिर्भावाल्लौकिकएवस्यात्।नचसर्वार्थसमाम्नातइतिवाच्यं·सकृदाम्नातस्या
ऽनेकार्थत्वानुपपत्तेः।नन्वाग्रस्यमाणविशेषत्वं·आनंतर्येणदेशभेदेनचविशेषणग्रहणा
त्।प्रथमस्यस्वसावनंतरोनतृतीयस्या।द्वितीयस्यतुयद्यप्यनंतरःतथापिपरस्ताज्ज्ञाविसेन
वाक्यशेषस्याकांक्षितत्वात्नपुरस्ताज्ज्ञाविनासंबंधः।प्रथमस्यत्वपेक्षितएवदेशेपठि
तः।तस्मात्तस्यैवायंशेषः।इतिप्राप्तेऽभिधीयते॥यथापेक्षितरूपेहिवाक्यशेषेसमर्पितेवैदि
नलौकिकःशेषोनम्रग्यानिःप्रमाणकः।१।सर्वानंतरंसकृत्पठितुमशक्यात्बुद्धिविपरि

राम
२१

वृत्तिमात्रेणसाकांक्षैः सर्वैः संबंधसिद्धेः पुनः पुनरसमाम्नातोयं शेषः सर्वार्थे नैवाम्ना
तइतियुक्तमंगीकर्तुं । एतावतैव वेदसमर्पितेनशेषेणसर्वेषांनैराकांक्ष्यसिद्धेः निःप्र
माणकोलौकिकोध्याहारः । शंकोत्तिवायंसर्वैः संबद्धः । प्रथमेन हि संबद्धो द्वितीयस्याप्या
कांक्षावेलायांबुद्धौविपरिवर्तमानत्वेनापिसंबध्येते । तत्संबंधाच्चविपरिवृत्यसंगात्तृ
तीयेनापिसंबंधसिद्धिः । तुल्यो ह्यस्यसर्वैर्योगः· कारणविशेषात् । एतावच्चशब्दानाम
न्वयेकारणं· आकांक्षासंनिधिः योग्यत्वं च· नह्यनंतरसमाम्नानं । व्यवहितसमाम्नातस्या
५८ पित्र्यसंबंद्धिव्यवधानाभावेबुद्धिविपरिवृत्तिरूपं संनिधानं सर्वत्रक्रमेणलभ्यते । तस्मा
दाम्नानमेवास्यसर्वार्थमितिसर्वशेषता । एवंतावत्साकांक्षेषु अनुषंग उक्तः ॥ यत्रतुनि
राकांक्षाणां एकार्थानां संनिधावेकस्यानंतरोवा व्यशेषः श्रूयते· यथा· चित्यत्तिस्त्यापुन

तु॰ वाक्पतिस्त्वा पुनातु॰ देवस्त्वा सविता पुनातु॰ इति सर्वे निराकांक्षा यजमानपावनार्थाः स

त्रिभिः पावयतीति २

त्यप्येकार्थत्वे वचनात्समुच्चीयंते॰ तेषां मंत्रेऽच्छिद्रेण पवित्रेणेति शेषः समाम्नातः सवि

पूर्वयोरप्यनुषज्यते॰ किं वा॰ परस्यैव मंत्रस्य शेष इति। तत्र॰ शेषस्तावदेकेनैवानंतरेण संबंधा

न्निराकांक्षः संपद्यते॰ शेषिणस्तु प्रागेव निराकांक्षाः। तेन निष्प्रमाणोऽनुषंगः॥ उच्यते॥

तु पुनातुशब्देनैकवाक्यतामुपगतोऽयमच्छिद्रादिः करणद्वारेण पावनक्रियाप्रकाशनार्थः।

सैव च क्रिया पूर्वाभ्यामपि मंत्राभ्यां प्रकाश्यते। तदर्थश्च वाक्यशेषः प्रधानवशात्तत्राप्यनु

षज्यत इत्यनुषंगसिद्धिः॥ व्यवा[illegible]यान्नानुषज्येत॥ ॥ संते वायुर्वातेन गच्छतां॰ संयजत्रै

रंगानि॰ संयज्ञपतिराशिषेति॰ गच्छतामित्ययं शब्दः संयजत्रैरंगानीत्यनेन बहुवचनांते

नायोग्यत्वान्न संबध्यते। संयज्ञपतिनाप्ययोग्यत्वात् अनुषंगेण संबध्यत इत्याशंकायां

राम २२

उच्यते।पूर्वत्रासंबंद्धेन बुद्धिविपरिवर्त्तिमेणान्यानुषंगः।सर्वत्रतुल्ययोगित्वादनुषंगोहि
वर्णितः।असंबंद्धतिरोधाने व्यवधानां तुल्यता॥१॥इतिशास्त्रदीपिकायांद्वितीयाध्याय
स्यप्रथमःपादःसमाप्तः॥ ॥शब्दांतरेकर्मभेदःकृतानुबंधत्वात्॥गतमुपोद्घातप्रसक्ता
नुप्रसक्तं।इदानींलक्षणार्थःकर्मभेदःशब्दांतरादिभिरभिधीयते।तत्रप्रथमंशब्दांत
राद्भेदोभिधीयते।इहैकप्रकरणगतानिअपर्यायधातुनिष्पन्नानिआख्यातानि
यजतिददातिजुहोतिइत्यादीन्युदाहरणं।अत्रहिसत्यपिप्रत्ययांशस्यैकत्वेधातु
भेदादाख्यातपदानिमिथःशब्दांतरंभवंति।तत्रसंशयः॥किमेकैवभावनोनाना
धात्वर्थानुरक्ताविधीयतेउतप्रतिधात्वर्थंभिद्यतेभावनेति।तत्राभिन्नासुभावना
सूत्पादनेकापूर्वकल्पनं।एकत्वमुपपन्नेर्थेनानेकंतच्चलभ्यते।१॥फलाप
कल्प्य

वर्तित्वात्क्रियाणां न फलभेदमंतरेण क्रियाभेदसंभवः। तद्यदि प्रतिधात्वर्थं भावनाभे
दः स्यात्ततः सा भाव्यरूपाऽपूर्वभेदादृते न भिद्यत इति अनेकापूर्वकल्पना स्यात्। न
चैकेनोपपन्ने वाक्यार्थेऽनेककल्पनं न्याय्यं। तस्मादेका भावना। किंच। भावना प्रत्यया
र्थत्वात्तदेकत्वान्न भिद्यते। गुणभूता हि धात्वर्था न तां भिंद्युः कथंचनापि। यद्यपि धातुभे
दादाख्यातपदानि भिद्यथः शब्दांतरं तथापि प्रत्ययांशः सर्वत्रैकरूपः। तदर्थश्च भा
वनात्तद्भेदादभिन्ना भवितुमर्हति। यदि हि धात्वर्थान्प्रति गुणभूता भावना स्यात्
ततस्तेषां धातूनां भेदे न भिन्नत्वाद्भावनापि तान्प्रत्युपादीयमाना प्रतिधात्वर्थं भिद्येत। राम
भावनाप्रधानत्वात्तु आख्यातस्य तां प्रत्युपादीयमाना धात्वर्थाः संहत्यैव तां विशिंषंति २३
ऋयमिवारुणिमादयः। तस्मात्न भावनाभेद इति प्राप्तेऽभिधीयते॥ प्रत्ययांशः समानो

विप्रतिधातुप्रयोगतः। तत्तदर्थानुसारेण भावनाभेदभावहेतौ॥१॥ निष्पद्येत समस्तेभ्यो धातुभ्यः प्र
त्ययो यदि। ततः सर्वविशिष्टा स्यात् द्वंद्वोत्पन्नसुबर्थवत्॥२॥ यदि वा प्रत्ययः शुद्धः सर्वधातुपृथक्कृ
तेः। श्रूयेत एव वा सर्वैर्विशेष्येत स धातुभिः॥३॥ नहि समुदितेभ्यो धातुभ्यः प्रत्ययः श्रूयते अ
ग्नीषोमादिभ्य इव सुप्प्रत्ययः। नापि पृथक्क्रौणातिरिवारुणादिभ्यडकः। येन सर्वैर्धात्वर्थैः
प्रातिपदिकार्थैरिव सुबर्थः पदेन. अप इवारुणादिभिर्वाक्येन युगपद्भावनाविशेष्येत। प्रत्येकं
तु धातुभ्यः प्रत्ययः श्रूयत इति नैकभावनासंभवः। तथा हि प्रत्ययोपजनिधातुपरः श्रूयमाणः
केवलं यागकरणिकां भावनां श्रुत्या विधत्ते। दानहोमौ तस्यां निविशमानौ पदांतरगतत्वा
द्वाक्येन प्रकरणेन वा निविशेयातां। ते च श्रुतितो दुर्बले। करणांशोपनिपातात्त्वास्ति विरोधः।
समुच्चयेनैरपेक्ष्यबाधः। तेन दानहोमयोस्तदनुवादेन विधानासंभवात्तदनुरक्ते

भावनैव तद्वतेन प्रत्ययेन विधातव्या। विहिताया अभिधानासंभवात् भावनां तरस्यांउ
च्चार्यमाण एव प्रत्ययः प्रकृत्यर्थभेदभिन्नामेवस्याभिधेयां भावनामवगमयति तस्मात्सि
द्धो धात्वर्थभेदेन भावनाभेदः॥ ॥ एकस्यैवं पुनः ख्यातिर विशेषात्स्वर्धिकं हि स्यात्॥ अभ्या
सादिदानीं भेदो भिद्यीयते। विधेरविशेषेण पुनः श्रवणमभ्यासः। यथा समिधो यजति तनू
नपातं यजती सादि पंचकृत्व आयत्तिपदमभ्यस्तं। तत्किमेकां भावनां प्रतिपादयति उत प्रत्ये
क्या संभावना भेद इति। तदर्थं चाकिमेक एव प्रयागः किं वा पंच प्रयागा इति। प्रयोगैकत्वे भाव
नैकत्वं तद्भेदे तु पूर्वाधिकरणन्यायेन धात्वर्थभेदात् भावनाभेद इति। तत्राप्रत्ययस्य प्रत्यभि
ज्ञानाद्वेदैकत्वं प्रतिष्ठितं। तदेकत्वात्तदर्थापि न भेदं प्रतिपद्यते॥ १॥ प्रत्ययांशस्य सर्वत्र समा राम २८
नत्वात्तदर्थस्यापि भावनाया एकत्वं प्राप्तमपि करणीभूतधात्वर्थभेदादपोदितं। इह तु

तस्यैव धातोः पुनः पुनः श्रवणात् असति च शब्दभेदे अर्थभेदस्य निष्प्रमाणकत्वात् स एव या-
गः सैव च भावनानुसमिदादिसंज्ञाभेदात् अथैष ज्योतिरित्यादिविधागभेदः स्यात् । नाश-
ङ्केक हैनार्थैकत्वस्य दृढतरप्रत्यभिज्ञानात् तस्यैव च यागेकर्तव्यतस्य समिदंसंज्ञावत्सद्भिस्यसं-
ज्ञांतरमन्याय्यमिति तनूनपादादिशब्दाः समिधादिदेवताविधायकाः स्युः इति न संज्ञाः येन संज्ञातो
भेदः स्यात् । पदिहितनूनपातं यजतीत्यादयो यागा [illegible] विधयो भवेयुः ततो विहितस्य
विधानायोगात् विधिपुनः क्रियायागभेदो भवेत् । असति च यो भेदे संज्ञांतरं युक्तमिति स्यात् तनू- ग
नपादादीनां संज्ञात्वं तेनाभ्यासनिमित्तभेदाधीनभेदपासंज्ञात्वमिति न संज्ञावशेन भेद-
सिद्धिः । एवं त्वप्राप्यायामगामा संज्ञात्वं सिद्धं । तत्र संज्ञातो भेदः यथा अथैष ज्योतिः उद्भिदा
यजेतेति । इह तु उपपदात् पोऽङ्कृत्य यजती सेतावन्मात्रं पंचकर्तोमप्रस्तं भेदं बोधयति

25

ति न वेत्येतदेव चिंत्यते। तत्र चाऽभेदावगमात् गुणविधिरेव तनूनपादादिशब्दैः। न च गुणाद्भे
दः सर्वेषां तनूनपादादीनां उत्पत्तिवाक्यशिष्टत्वेन दध्यादिवदभेदकत्वात्। समिधो
यजतीति चोत्पन्नो समिच्छब्दस्य नामधेयत्वेन गुणाभावात्। न चाग्नये समानविशेषत्वं प्रथ
मोच्चरितत्वेन समिद्वाक्ये यागविधिः इतरेषु तत्प्रत्यभिज्ञानात् तदनुवादेन गुणविधिः
चरमश्रुतत्वात्। एवं गुणविधानार्थत्वादेव पुनःश्रुतेर्नानर्थक्यं। सत्यपि चानर्थक्ये न दो
षः। न हि प्रयोजनवशेन प्रमाणं नेतुं युक्तं। तस्मादेको यागः। तदेकत्वाच्च भावनापूर्व
योरप्येकत्वमिति प्राप्ते ब्रूमः। विधेस्तावत्स्वभावोऽयम् अप्रवृत्तप्रवर्तनं नाम प्रवर्तनं। धात्वर्थभाव
योरेव तच्छ्रुत्या यागम्यते ॥१॥ यत्तावदुक्तं अभ्यवतामेव त्वानर्थक्यमिति। तदयुक्तं। विधि राम
श्रुतिविरोधात्। तथा हि स्वतो प्रवृत्तप्रवर्तनं गम्यते। तच्च बलवत्तात्कारणांतरेणान्यथात्वं प्रति २५

पद्यते। नचात्र तदस्ति। तद्यद्येकमेव कर्म स्यात् तस्य पूर्वं विहितत्वादप्रवृत्तप्रवर्तनात्मा वि
धिरुपरुध्येत। तेन विधिवशात्कर्मान्तरं। ननु दृष्टप्रत्यभिज्ञया कर्मैकत्वमिति। तन्न। संनि
धिकृता हि प्रत्यभिज्ञा। विधिश्रुत्या तु भेदज्ञानं। संनिधेश्च श्रुतिर्बलीयसी। ननु यजिश्रु
तिकृतैव यत्प्रत्यभिज्ञा। न। यागोयमिति श्रुत्यावगम्यते। न पुनः स इति वाऽन्य इति वा। सा
धारण्येन तदभिधायिन्याः श्रुतेः संनिधिकृतामभेदबुद्धिमनभिजानंतः श्रुतिकृतां मन्यं
ते। तस्माद्विधिश्रुत्या कर्मभेदः। यदप्युक्तं संनिधिकृतप्रत्यभिज्ञानाऽबाधाय गुणवि
धानार्था पुनः श्रुतिर्भवतीति तदप्ययुक्तं। श्रुतिविरोधादेव। पदलक्षणया एकप्रत्ययो
पादानलक्षणया च श्रुत्यावबाधादपूर्वभावनयोरेव विधेयत्वं गम्यते। न तु संनिधिमात्रेण
बाधितुं शक्यते। यदि हि तनूनपादादि दध्यादिवदविधीयमानमनर्थकं स्यात् ततस्त

26

स्यावश्यंविधेयत्वात् अनेकार्थविध्यशक्त्या कर्मानुवादाकांक्षायांसंनिधिकृतमभेद
ज्ञानंविधिरनुमन्येतायद्वातुमंत्रवर्णप्राप्तत्वात्तनूनपादादिदेवतानांतत्प्रख्यन्यायेन
नामधेयत्वेनअनुवादत्वेनवासंभवान्नानर्थक्यंतदाश्रयवगतकर्मविधानंनबाधि
तव्यंतस्मात्यागभेदाद्भावनाभेदस्तद्भेदादपूर्वभेदः॥प्रकरणंतुपौर्णमास्यांरूपा
वचनात्॥ ॥इदानीमभ्यासस्यापवादः क्रियते। यदाग्नेयोष्टाकपालोमावास्यायांपौर्ण
मास्यांचाच्युतोभवति·तावब्रूतामग्नीषोमावाज्यस्यैवनावुपांशुपौर्णमास्यांयजन्·
ताभ्यामेतमग्नीषोमीयमेकादशकपालंपौर्णमासेप्रायछत्·ऐंद्रंदध्यमावास्याया
मैंद्रंपयोमावास्यायामितिकालसंयुक्तानिवचनानिश्रूयंते। तथा·समिधोयजति·त
नूनपातंयजति·आज्यभागौयजति·इत्यकालसंयुक्तानि,तेषांसन्निधौ·यएवंविद्वा

राम
२६

न्यौर्णमासीं यजते य एवं विद्वानमावास्यां यजते ॰ इति वाक्यद्वयं श्रुतं तथा दर्शपूर्णमासाभ्यां
स्वर्गकामो यजेतेति फलं श्रुतं तत्र विचार्यते । किमनेन फलवचनगतेन यजिना संनिहि
ताः सर्वे यागा राजसूयवत्फलं प्रतिविधीयमानाः समप्रधानाः किं वा य एव कालसंयु
क्ता यागास्तेषामेव फले संबंधेन प्राधान्यं अन्येषां तदंगत्वमिति तत्सिद्ध्यर्थमिदं विचारयित
व्यं ॰ य एवं विद्वानित्येवं संयुक्तो य इति प्रकृतानामाग्नेयादीनां यागानां पौर्णमास्याका स्यमावाप
लयुक्तानां तन्निमित्तप्रसिद्धनामधेयत्वात् पौर्णमास्यमावास्याशब्दाभ्यां विशेष्यमाणा
वनुवदितारौ उतापूर्वयोः कर्मणोरेवं संज्ञकयोर्विधातारौ विति तत्सिध्यर्थमप्येतच्चिं
तनीयं ॰ किमसर्वकर्मविधोत्पन्नश्च नैनवेति ततोऽप्येतद्विचार्यते ॰ किं वाग्नेयौ पौर्णमास्या
मनूच्येते वृधन्वती अमावास्यायामित्येताभ्यां ॰ यदाग्नेयोऽष्टाकपाल इत्यादि त्रिभिर्वाक्ये वीक

87

र्मणोरनयोरूपं विधातुं शक्यं नवेति तातो ऽपि पुनर्विचारणीयं किं प्राप्तकर्मानुवादेनानेक
गुणविधानमेकेन विधिना संभवति उत नेति अत्र चाभ्यासापवादार्थवादाधिकरणस्य
यएवं विद्वानिसेवं संप्रयुक्तमेव वाक्यद्वयमधिकरणस्य विषयः। तच्च कर्मान्तरस्य वि
धायकं समुदायानुवादकं वेसेतावदेवाधिकरण शरीरं। एतस्य
तु फलं समप्रधानांगांगिभावविचारः। फलविचारविषयत्वेन चाग्नेयादिवाक्यानामुपन्या
सो नाधिकरणशरीरविषयत्वेनातत्र। पूर्वाधिकरणन्यायेन विधिपुनःक्तस्याकर्मान्तर
त्वं पौर्णमास्यमावास्यासंयुक्तयोः। किं पुनरनयोर्द्रव्यदेवतं। उच्यते। द्रव्यं तावत् चतुर्धा
वायां गटकातीयसंयुक्तोऽत्यन्तं ध्रौवमाज्यं प्रयोजनापेक्षं द्रव्यापेक्षिणां प्रकरणगतानां स राम
र्वकर्मणामविशेषेणालिंगप्रकरणाभ्यां संगंमवद्रुपांशुयाजादीनामिवानयोरपि कर्मणो ३७

र्लभ्यते। वचनाद्वा· सर्वस्मैवाएतद्यज्ञायगृह्यतेयद्ध्रुवायामाज्यमितिदेवतापिचवार्त्रघ्नीपौर्ण
मास्यमनूच्येतेवृधन्वतीअमावास्यायामितिवाक्याभ्यांपौर्णमास्यमावास्यासंज्ञयोरनयो
र्मंत्रविधानमात्रंवर्णिकीतिरूपत्वात्तत्कर्मांतरत्वा। अन्यथासमसास्यानुवादस्यानर्थ
क्यांनुकेवलंयएवंविद्वानिष्टेत्तयोरेवानर्थक्यं·पौर्णमास्यांपौर्णमास्यायजेतामावास्या
मा यामवास्ययायजेतेत्येतदपिवाक्यद्वयमनर्थकंस्यात्।नस्यान्नेनाग्नेयादीनांकालोविधीय
ते·तेषामुत्पत्तिवाक्यैरेवकालस्यविहितत्वात्तायदानुयएवंविद्वानिष्टेताभ्यांपौर्णमास्यमा
वास्यासंज्ञकेकर्मांतरेविधीयेतेतदातयोःकालविधानात्पौर्णमास्यांपौर्णमास्येत्येतद
पिवाक्यद्वयमर्थवद्भवति।तस्मात्कर्मांतरविधानंयदाचैवंतदासर्वेयागाःफलसंबं
धात्समप्रधानभूताःनहितदाफलवाक्यात्तदर्शपूर्णमासपदमलमाख्यातमवच्छेत्तुं·

अप्रसिद्धार्थत्वात्। कालनिमित्तं ह्येतत्तद्द्विवचनांतं चात घेषामुत्पत्तौ द्विसमाज्यभागादीनां॰ नते
षु प्रातिपदिकं समर्थं॰ कालसंयोगाभावात्। येषां आग्नेयादीनां कालसंयोगः तेषां बहुत्वात् द्विव
चनानुपपत्तेः असमर्थं [illegible] पदं। न च समुदायद्वयापेक्षया द्वित्वसंभवः। समुदायोपि पू
र्वसिद्ध एव वा गृह्येत॰ अत्रैव वा राजसूयवत् संपद्येत। न तावत् पूर्वसिद्धमस्ति समुदायद्वयं
२८ एकाधिकारस्यानुप्रवेशेन हि कर्मणामेकसमुदायापत्तिः। एकाभिधाने न चैकावगतिः। न चाग्ने
यादिकर्मणां त्रिकस्य त्रिकस्यैकाभिधानं प्राक्सिद्धं॰ य एव विद्वान् सिसतयोस्तदनुवादत्वा
नंगीकरणात्। उत्पत्तिवाक्येषु चैकैककर्मविधाने न समुदायाभावात्। न च फलवाक्यगतेन य राम
जिनात्रैणा सर्वेषामुपादानात् समुदायापत्तिः स्यात्। तेन न चैकसमुदायनिष्पत्तौ राजसूया २८
दिवत् द्विवचनानुपपत्तिः। न च दर्शशब्देन पूर्णमासशब्देन च त्रिकस्य त्रिकस्य पृथक् पृथक्

तंत्रोपादानात् समुदायद्वयसिद्धिरिति वाच्यं॰ तयोराख्यातपरतंत्रत्वात्। तत्र यत्राख्यातं व
र्त्तते तत्र ताभ्यामपि वर्त्तितव्यं। न चाख्यातं तंत्रे एकेनानूयागौ प्रथममुपादाय पुनरन्यानुपादा २२
तुमर्हति॰ सकृदुच्चरितत्वात्। न च समुदायद्वयं तंत्रेणाशक्यमुपादातुं॰ समुदायद्वयस्य
प्रागसिद्धत्वात्। तदिदमाख्यातं बहून् यागान् संनिहितान् फलमेकं प्रति तंत्रेणोपाद
नेन तेषां च तदुपादानादेवैकः समुदायोऽत्रैव निष्पद्यते॰ ततश्च नामधेयमपि समुदाया
भिप्रायं बहुवचनं समुदायाभिप्रायं वैकवचनं लभेत॰ न कथंचिद्द्विवचनं॰ द्विवचनां
तं चेदं। अतोऽप्रसिद्धार्थत्वान्नानेनाख्यातविशेषस्यापायितुं शक्यमिव विशेषात् सर्वेषां
फलसंबंधाप्राधान्यं। नामधेयमपि तत्परतंत्रत्वात् सर्वेषामेवानुपपन्नं द्विवचनप्रति
रूपकमिति प्राप्ते अभिधीयते॥ कर्मांतरविधायित्वे स्यात् सर्वेषां प्रधानता। समुदायानुवा

दोनुरूपाभावादित्योमसो ॥१॥ द्रव्यं कथंचिल्लभ्येत देवता तु न लभ्यते लभ्यते मंत्रवर्णाच्चेन्न
ऽन्यभागांगतायतः ॥२॥ लिंगक्रमाभ्यां मंत्राणामाज्यभागोगतास्थिता वचनं तु व्यवस्थार्थमन्या
र्थवादबाधतः ॥३॥ वार्त्रघ्नीवृधन्वतीनां हि लिंगक्रमाभ्यामाज्यभागांगत्वेनाऽव्यवस्थाया
२१ प्राप्तानां तादर्थ्याऽबाधेन व्यवस्थामात्रं वार्त्रघ्नी पौर्णमास्यां वृधन्वती अमावास्यायामि
त्येताभ्यां विधीयते ॥ न्यायवादिति नैनेषां मंत्राणां य एवं विद्वानिति विहितकर्मांतरसंबंधः ॥ ये
न मांत्रवर्णिकी देवता स्यात् न च कल्प्यापि तु देवता शक्याते विधिगम्यत्वाद्देवतावस्थानत्वा
ऽसत्यां देवतायां यागानुष्ठानं संभवतीति गम्यमावास्यासमुदायानुवादत्वात् तत्र पौर्णमा राम
सीसंयुक्तेन वाक्येनोपपदवशात् पौर्णमासीकालयुक्तानां त्रयाणां तत्त्वेनानुवादः ॥ २८
तेनैवैकानुवादेन त्रयाणामपि तेषामेकसमुदायापत्तिः तदेकत्वात् पौर्णमासीमित्येकव

चनं। पूर्वममावास्यासंयुक्तेपि ततश्च समुदायद्वयसिद्धिः · कालयोगाच्चाग्नेयादीनां प्रति
ष्ठार्थं दर्शपूर्णमासाभ्यामिति द्विवचनातं कालयोगिश्चोपपद्यं शक्यो साख्यातमाग्नेया
दिषु व्यवस्थापयितुमिति तेषामेव प्राधान्यं। इयमेव द्विवचनापेक्षित समुदायद्वयसि
द्धिः समुदायानुवादप्रयोजनमिति नानर्थक्यं। यच्चोक्तं पौर्णमास्यां पौर्णमास्या यजेता
मावास्यायाममावास्यया यजेतेत्येतदपि वाक्यद्वयमनर्थकं स्यात् इति · नानर्थकं ·
आग्नेयादीनामपि त्रिकस्य त्रिकस्य सहप्रयोगार्थत्वात् · उत्पत्तिवाक्येषु हि तेषां प्रत्ये
कं कालयोगात् नैकप्रयोगतासिध्येत् · अनेन तु वचनेन यथैकप्रयोगसिद्धिस्तथैव
कादशे वक्ष्यामः। तस्मात् अरूपत्वात् प्रयोजनवत्वाच्च समुदायानुवादत्वं ॥ ॥ इदानीं पूर्व
पक्षवादी प्रकाशान्तरेण प्रत्यवतिष्ठते। नवेदेवमेरूपत्वे समु दायानुवादता। यदाग्ने

30

याद्दिवाक्येस्तत्तयोरूपंविधीयते॥१॥यएवंविद्वानिस्येतांपौर्णमास्यमावास्यासंज्ञ
कौयागौविधीयेते॥यदाग्नेयोऽष्टाकपालइत्यादिभिस्तुपौर्णमास्यमावास्यासंज्ञाभ्यां
तावेवयागावनूद्याष्टाकपालादिद्रव्यमग्न्यादयश्चदेवताविधीयंतइतिनारूपवाक्यंए
वंसर्ववाक्यानिविधायकानिभवंति॥नकश्चित्समुदायानुवादः॥यागश्चप्रत्यक्षश्रुतः
नद्रव्यदेवतासंयोगादनुमातव्योभवतीतिश्रेयानयंपक्षः॥अत्रोच्यतेगुणोऽनेकःप्रा
प्तकर्मानुवादतः॥नैकेनविधिनाशक्योविधातुमसमुच्चितः॥१॥भावनायामपिविधिस्त
दर्थभेदेनतत्रतत्रसंक्रामति॥यत्रपरश्चविधिःसएवविधेयोनान्यस्तादृशोपियदा राम ३०
ऽपूर्वकर्मपरोविधिर्भवतितदातस्यैकस्याऽनेकगुणविशिष्टस्यविधानाद्विशेषणा
नांचार्थापत्त्याविधिसिद्धेर्नासकृच्छ्रवणदोषःप्रसज्यते॥यदात्वन्यतःप्राप्तंकर्मभवति

तदा तस्याऽविधेयत्वात् विशेषणपरो विधिर्भवति। तत्राऽनेकेषु विशेषणेष्वेकेन विहितेष्वे-
तराऽनाक्षेपात् तत्राप्येकस्यैव विधानं कर्तव्यमिति आवृत्तिप्रसंगः। विशेषणान्यपि यानि प्रा-
गेव क्रियाकारकाऽसंबंधितया शब्देन प्रतिपादितानि विधिनैव विधिनाऽप्रसिद्धसंबंधा-
नि भवंति। यथा पशुनेत्येकपदोपात्तानि जातिलिंगसंख्याकारकाणि। तत्र हि प्रत्ययाभि-
धेयमेकं प्रधानभूतं कारकं उपसर्जनभूतजात्यादिविशिष्टं पदेन प्रतिपादितं। प्रसि-
द्धा हि कारकशक्तिर्जात्यादीनां प्रमाणांतरेणाविनैव विधिनेति शक्यं प्रापकमनुवादेना-
पि तदानेकविधानं। भिन्नपदोपात्तान्यपि यानि सामानाधिकरण्येन षष्ठ्या वा क्रियान्व-
यात् प्रागेव मिथः संबंधे शब्दतोऽवसितान्यविधिमनादृत्यैव लभ्यंते। यथाऽभ्युदितेष्टौ पे-
ष्टोदिष्टास्यान्विष्णवे शिपिविष्टाय शृते चरुमिति। तत्र हि शिपिविष्टशब्दो यौगिकः शक्नोति

न्ययान्मिथः ३

अग्नीषोमीयं प-
शुमालभेतेत्यत्र
विशिष्टविध्यादि-
त्तोयविधिः ६

गोः

तस्य द्वादश-
शतदक्षिणा ७

पशुनेत्यादिग्रन्थांतरेण ४

संनिहितेन विष्णुशब्देन स्कोसेव सामानाधिकरण्यं प्रतिपत्तुं· प्रसिद्धश्च विष्णुः शिपिविष्टोयं
त्रार्थवादादिभिरिति· तत्र केवलं तस्याश्रुतसहितस्योदिष्टसंबंधो विधिना बोधयितव्यः·
31 यो विष्णुः शिपिविष्टः सश्रुतस्यस्योदिष्टानां चेदेवतेति· तेनैकार्थविधानादिविप्रत्ययस्य
माऽसकृदुच्चारणापत्तिः। अत्र वाग्नेयोष्टाकपालः पौर्णमास्यामिति यद्यपि तद्धितस्य संनि
हितद्रव्यवचनत्वात् सामानाधिकरण्यलक्षणः शाब्दः संबंधः प्रागेव पौर्णमासीसंबं
धात् आग्नेयाष्टकपालयोर्लभ्यते· तथाप्यऽसौ संबंधः प्रमाणांतरेणासिद्धत्वादत्रै
व विधातव्यः· तं च विधाय पुनः पौर्णमासीसंबंधविधिरित्यावृत्तिप्रसंगः न त्वेवं संभ
वति· य आग्नेयोष्टाकपालः स पौर्णमास्यामिति· असिद्धत्वादाग्नेयस्याष्टाकपालस्य। राम ३१
अत एवं वक्तव्यं· आग्नेयः अष्टाकपालः कर्तव्यः स च पौर्णमास्यामिति· तत आवृत्तिः

प्रत्ययस्य स्यात्। तस्मादेवं विद्वानिति विहितकर्मानुवादेनात्र गुणविध्यसंभवान्नूत्र
वश्यमत्र भावनांतरं द्रव्यदेवताविशिष्टमाक्षिप्तयाजिकं विधातव्यं न च भावनांतरं
भावनांतरस्य स्वरूपं भवतीति सिद्धमरूपत्वांततः समुदायनुवादो॥ ॥पौर्णमासीव
दुपांशुयाजः स्यात्॥ ॥अतः परं समुदायानुवादापवादकं तयाऽधिकरणत्रयमार
भ्यते दर्शपूर्णमासयोः श्रूयते जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपां
शुयाजमंतरा यजतीति विष्णुरुपांशुयष्टव्योऽजामित्वाय प्रजापतिरुपांशुयष्टव्योऽ
जामित्वायाऽग्नीषोमावुपांशु यष्टव्यावजामित्वायेति। तथाग्नेयाग्नीषोमीयपुरोडाश
याज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीयाणि याज्यानुवाक्यायुग
लानि शाखाभेदेनाम्नातानि तत्र संशयः। किमुपांशुयाजमंतरा यजतीति समु

दायानुवादो विष्ण्वादिगुणकानां यागानां॰ उत विधिरिति तन्निदर्थं च किंस्य स्वरूपमस्ति नवेति तत
दर्थमपि विष्णुरूपांशुयष्टव्यइत्यादिभिर्विष्ण्वादिदेवत्यायागा विधीयंते॰ किं वायमर्थवाद इति
यदि विधयस्तत स्तेषामेव यागानां विष्ण्वादिदेवत्यायाऽप्यानुवाक्यालिंगक्रमाभ्यामंगंभ
वंति॰ नोपांशुयाजमंतरायजतीत्यस्य॰ सामर्थ्याऽपरिज्ञानात। ततश्च मांत्रवर्णिकदे
वतालाभाभावात् अस्वरूपः सन्नग्रगत्या विष्ण्वादियागानां समुदायमनुवदतीति यदा तु वि
ष्ण्वादिश्रवणमर्थवादः तदा याज्यानुवाक्याः योगांतराभावात् उपांशुयाजमंतरायजतीत्य
स्यैव क्रमादंगं भवंतीति दशमाधिकरणन्यायेन मांत्रवर्णिकी देवता लभ्यते॰ श्रोवं च द्रव्य
मिति रूपलाभात् विधिरेव भवतीति तत्र विष्ण्वादिवाक्येषु तव्यप्रत्ययदर्शनात्॥ ऐकां राम
तिको विधिर्नाऽत्र वर्त्तमानाऽपदेशतः॥१॥ वैश्वानरादिवाक्येहि यदष्टाकपालो भवतीत्यादि ६२

पुविधिपुरुषव्यापारयोरश्रवणात्पयस्यद्वोपबंधवर्त्तमानापदेशेन चार्थवादस्वरूपत्वात् स
द्वादशकपालं निर्वपेदिति विधिपुरुषभावनाश्रवणात्तदुपक्रमोपसंहारमध्यवर्त्तिनाम
ष्टा[illegible]दीनां तदेकवाक्यत्वेन बाधितव्यमिति गुणफलविधानं निरस्तं। इह तु सत्यपि जा
मित्वाजामित्वोपक्रमोपसंहारमध्यवर्त्तित्वे विष्णुर्यष्टव्य इति यच्छब्दाचानुपहत विस्प
ष्टविधिश्रवणात् अजामितायेति च तेषां प्रत्येकमुपक्रमोपन्यस्तजामित्वदोषपरिहा
र[illegible]प्रशंसावगमात् वाक्यभेदमंगीकृत्य विधित्वमध्यवसीयते। जामिवा एतदिति
चोपक्रमश्रवणमपि तेषामनुषंगेन वाक्यशेषो भवति। सति च तेषां विधित्वे रूपाभावा
द्वर्त्तमानापदेशाच्चोपांशुयाजमंतरा यजतीत्ययं जामित्वोपन्यासेन प्रस्तुतानां वक्ष्य
माणानां विष्ण्वादियागानां समुदायानुवाद इति प्राप्तेऽभिधीयते। जामित्वोपक्रमादे

कमजामित्वोपसंहृतेः।वाक्यंतन्मध्यपातास्य विष्णूदेरर्थवादता।१।वाक्यशेषानुषंगश्चागतौ
सत्स्यांनयुज्यते।अनूचीननिमित्तश्चजामिदोषः प्रकीर्तितः।२।तेनांतरालसंयुक्तोविधिस्त
33 त्रैवनिश्चितः।अजामित्वंचतस्यैवप्रशंसेत्यवधारितं।३।जामित्वात्तेयज्ञस्यक्रियतेयदन्व
चोपुरोडाशाविति पुरोडाशमंतरंतयोर्जामिदोषाभिधानात् उपक्रम एवैतदध्यवसितंमूल
मंतरालेकिंचिद्विधित्सितं।तच्चांतरालकरणादेवाजामित्वगुणेनप्रशंसिषितमिति।किं
तुतद्विधेयमित्येतावदनवगतं।अंतरालसंयुक्तंतुतद्विधानमित्यवगतमेवानचविष्णू
द्विवाक्येषुअंतरालसंयोगोस्तियेनविधिःस्यात्।अंतरालेचाविहितानांनाजामित्वेन राम
प्रशंसावकल्पते।पुरोडाशानंतरंतर्यात्जामितास्यात्।अतोऽन्यत्रक्वचित्विष्ण्वादयोयष्टव्या २३
अजामित्वायेतिकिंकेनसंगतं।तस्मादुपांशुयजमंतरायजतीत्युपांशुगुणकोयागोंत

रात्रोपलक्षितेकाले विधीयते·तदर्थवादोयंविष्णुरुपांशुयष्टव्य इत्यादि मंत्रवर्णप्राप्तवि
विष्णु प्यनुवादेनेतिन्याय्यं।एवंचैकवाक्यत्वंनबाधितंभविष्यति।नचानुषंगः सत्यांगतौ
कल्प्यतोभवति।तस्माद्विधिरयंनसमुदायानुवादः॥आघाराग्निहोत्रमरूपत्वात्॥ ॥
अग्निहोत्रंजुहोत्याघारमाघारयतीतिनिर्गुणंकर्मसंज्ञापुरस्कृतंतत्संनिधौचदध्नाजुहो
ति·ऊर्द्ध्वमाघारयतीत्यादीनिसगुणानिश्रवणानितत्रसंशयः।किंदध्नाजुहोतीत्यादिभि
तीत्यादिभि गुणविशिष्टाहोमाघाराविधीयंते·तेषांत्वरूपवतामरूपोयमग्निहोत्रंजुहोति
आघारमाघारयतीतिसमुदायानुवादः।उतायमेवकर्मविधिः इतरेत्वत्रैवगुणविध
इति।तदर्थमिदंविचार्यते।किमविज्ञातरूपंकर्मविधातुमेवअशक्यंउतअविज्ञातरूप
मपितावद्विधायपश्चाद्रूपज्ञानंसंभवतीति।तथेदमपरंचिंतनीयं।प्राप्तेकर्मणिगुण

३५

मात्रविधानं संभवति उत्तमेति। न त्वस्य पापरिज्ञाने विशेषाऽनवधारणात्। सामान्यस्याऽवि
धेयत्वान्नाऽनयोर्विधिसंभवः।१। न च दध्यादिभिर्वाक्यैः प्राप्तकर्मानुवादतः। गुणमा
त्रं विधातव्यं अव्यापारात्मकं यतः।२। अग्निहोत्रं जुहोतीति होमसामान्यमवगम्यते न च
तद्विधानयोग्यं विशेषस्त्वयोग्यः सचानुरंजकाधीननिरूपण इति न जुहोतीत्येतावता
वगम्यते न चेह द्रव्यदेवतादिकमनुरंजकमुपात्तं यद्दर्शनेन विशेषावधारणं स्यात् अनि
रूपितस्य विशेषो न विधिनान्वेतुं योग्यः तेनानवगतस्य सामान्यस्यायोग्यत्वात् योग्यस्य च
विशेषस्यानवगतत्वात् नात्र विधिः संभवति। न त्वाग्निहोत्रमिति संज्ञा च विशेषविषयत्वा
त् अनवगते विशेषे दुर्बोधैव। यदा चैवं विधिरेव अनिष्पन्नः तदा न दध्यादिवाक्यैरपि गुण
विधानं शक्यं। विहिते कर्मणि तदनुवादेन ते गुणा विधातव्याः। न चात्र विहितं कर्मेत्युक्तं। अपि

राम
२४

च॰ यद्यप्यत्र कर्म विधीयते तथापि न शक्यते गुणो विधातुं॰ अव्यापारात्मकत्वात्॰ चेतनप्रव
र्तनात्मको हि विधिः॰ न चासौ स्वव्यापारादन्यत्र प्रवर्त्तयितुं शक्यते॰ तेन दध्यादिवाक्यै
रपि व्यापार एव विधातव्यः॰ तद्विशेषणतया च दध्यादीनां विधिरंगीकर्त्तव्यः। न चाग्निहो
त्रवाक्यविहितो होमः पुनरन्यत्र दधिविशिष्टो विधातुं शक्यते॰ विहितस्य विधानायोगात्॰
तेन दधिमात्रमेव विधीयते॰ तच्चाविधेयमित्युक्तो अतोत्र दध्यादिविशिष्टहोमा विधीयं
ते। तथा चाग्निहोत्रमित्यस्यान्यतोपि रूपालाभात्समुदायानुवादत्वं। एवमाघारवाक्ये
पीति प्राप्ते ब्रूमः। प्रकृतानामसद्भावात् कर्मणां नानुवादता। न हि दध्यादिवाक्येषु दध्याद्या
क्षिप्तशक्तिनो। १। विधिना शक्यते कर्म विधातुमितरत्र तु। अनन्याक्षिप्तशक्तिस्तु विधिः कर्मै
कगोचरः। २। दध्ना जुहोतीत्यऽप्राप्तदध्याद्याक्षिप्तशक्तिर्विधायको नैकविधिनिमित्तगौरव

परिजिहीर्षया कर्मानुवादं प्रार्थयमानो यदि न कथंचिदपि प्राप्तिं लभते ततो विशिष्टं विधिमं
गीकरोति । सत्यां वाग्निहोत्रादिवाक्येन कर्मणः प्राप्तौ तदनुवादेन गुणमात्रविधानं लाघ
35 वात् । न विशिष्टविधानं । अत एवाविहितत्वाद्धोमानामप्राप्तत्वात् अग्निहोत्रवाक्ये अनन्या
क्षिप्तशक्तिर्वाक्यं विधायकः कर्मविधिः । ततो यद्यपि तत्र रूपं न श्रूयते तथापि विधिवशादेव
सामान्यमतिक्रम्य तल्लक्षितोऽन्यत्राऽविहितो होमविशेषो यागस्तेतावदवगमात्रविधा
ना[illegible]संभवः । तल्लक्षितविशेषविषयत्वेन संज्ञोपबंधोऽप्युपपन्नः । तस्य च दध्यादिवा
क्ये रूपविधानान्नाऽरूपत्वं । स्वरूपेण विधेयमपि दध्यादि व्यापारविशिष्टं शक्यं विधा
तुं दध्ना जुहुयादिति । यद्यपि न क्रियां विहाय द्रव्यविधिः प्रतीयते तथापि तस्यामेव विशि राम ३५
ष्टायां प्रतीयमानो विधिः स्वरूपेण तस्याः प्राप्तत्वात् अप्राप्तगुणमात्रपरतामवलंबमानः

न

फलतो गुणविधिरित्युच्यते। न प्रतीतितः। तेनात्र गुणमात्रविधानमग्निहोत्रं जुहोतीति
२वा प्रकृतकर्मणो नामात्तद्रूपलाभाच्च विधिरेव। समुदायानुवादः॥ ॥द्रव्यसंयोगाच्चोद
नापशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन॥ ॥अग्नीषोमीयं
पशुमालभेतेति श्रूयते। तथा। हृदयस्याग्रेऽवद्यति। अथ जिह्वाया अथ वक्षसः इत्यादीनि। तथा
सोमेन यजेतेति श्रुतौ तत्रापि ऐन्द्रवायवं गृह्णाति। मैत्रावरुणं गृह्णातीत्येवमादीनि। तत्र संशयः।
किमवद्यति गृह्णातिभ्यां चोदितानां कर्मणामिमावालभतियजती समुदायस्यानुवदितारौ। उ
त पूर्वयोः कर्मणो विधाताराविति। तदर्थं च किमैन्द्रवायवादिवाक्यैर्यागा विधीयन्ते किं वा सं
स्कारमात्रमिति। तत्राह ऐन्द्रवायवमित्यादि द्रव्यदेवतसंगतो याग एव विधातव्यो गृह्णातिना हि
व देवता। ऐन्द्रवायवमित्यादितावद्देवता तद्धितोक्ता। न च देवता यागादन्येन संपादयितुं शक्यते।
येन ग्रहणेनैन्द्रवायवं कुर्यादिति वाक्यार्थः स्यात्। न चेन्द्रवायवं संतं गृह्णातीति संभवति

असिद्धत्वादैंद्रवायवस्यातेनावश्यं याग एव विधातव्यः। ननु नायमवश्यं देवतातद्धितएव. त
स्येदमिति संबंधमात्रेपितस्य स्मरणात् तेनैंद्रवायूद्देशविशिष्टग्रहणमात्रविधिः संभवत्येवा
36 मवेदेव मैंद्रवायवादिषु परिहारः। मरुत्वतीयादिषु तु देवतायामेवच्छ विधानात् अवश्यं देव
तासंबंध एवांगीकर्तव्यः। तथा चैंद्रवायवादिष्वपि तथास्तु। किमनिरूपितसंबंधमात्राश्रयेण
न. तस्माद्यागविधानं एवं च सोमेन यजेतेति देवताऽभावात् अरूपः सन् समुदायानुवाद
एव भवति यजिः। सोमशब्देन तु तत्रैव गृह्णातिना सामान्याक्षिप्तं द्रव्यं निरूप्यते। यद्वा. अप्या
धारया गृह्णातीति गुणवाक्येन धारासमर्थद्रवद्रव्यमात्रावगमात् तत्प्रकृतित्वेन सोमविधा
नं व्रीहिभिर्यजेतेतिवत्। ननु. विकृतौ प्राप्तायां प्रकृतिविधानं युक्तं. नचैंद्रवायवादिवाक्ये राम
षु पुरोडाशवत् विकृतिरूपाप्ता. यस्याः प्रकृतिर्विधीयेत। यदि तु सोमम् अभिषुणोति. सोमं ३८
पावयतीत्यादिभिः सोमरसस्य प्रकृतत्वात् तद्विषयत्वाद्य गृह्णातेः प्राप्त एव विकृतिर्नतो

रस इत्युच्यते· ततस्तस्य विकृतित्वे सोमप्रकृतित्वान्न भूयः सोमविधानं संभवति। नचाप्यव्याधा
रयेष्यतोपि विकृतिप्राप्तिः। उदकस्यापि द्रवद्रव्यस्य संभवात् उच्यते। यदि विकारानुवादेनै
व प्रकृतिविधानं स्यात्· ततोयं दोषः स्यात्· न च व्रीहिभिर्यजेतेत्यपि पुरोडाशानुवादेन व्रीहि
विधिः पुरोडाशस्यानुपात्तत्वात्· व्रीहिभिरिति च करणविभक्तेः द्रव्यसंबंधाभावात् तेन यागं
प्रतिकरणत्वेन विहितो व्रीहियः पुरोडाशावरुद्धे यागे साक्षात्करणत्वासंभवात् तत्प्रकृतित्वे
नैव करणं संभवतीति प्रकृतिद्रव्यविधिरित्युच्यते· न प्रकृतित्वेनैव विधानात्। एवमत्रा
पि यागप्रतिकरणत्वेन विहितः सोमो धारासमर्थद्रवद्रव्यावरुद्धे यागे तत्प्रकृतिर्भवति
संभवति च सोमप्रकृतिके द्रवद्रव्यमिति युक्तं प्रकृतिद्रव्यविधानं। अथवा सोमभिषुणोति इ
त्येवमादिभिः सोमरसस्य प्राप्तत्वात् सोमशब्दोपि अनुवाद एवं तत्प्रख्यन्यायेन नामधेयं भ
वति। तदेवं त्रेधा एवं पक्षाः। सोमशब्देन द्रव्यं विधीयते· प्रकृतिद्रव्यं वा· नामधेयं वेति।

यजिस्तु सर्वथा समुदायानुवादः। तथा च यागभेदादैन्द्रवायवादीनां समुच्चये सति दशैतानध्वर्युः
प्रातःसवने ग्रहान् गृह्णाति। आश्विनो दशमो गृह्यते तं तृतीयं जुहोतीत्यादिक्रमसमुच्चयप्रद
र्शनमुपपद्यते। अन्यथा त्वेकयागस्य तद्धर्मिनां देवतानां ग्रहाणां चाविकल्पे सति क्रमादि
दर्शनानुपपत्तिः। यदि च सोमेन यजेतेति यागविधिः स्यात् ततः सोमशब्दस्य लतावचनत्वात् त
३१ येवोत्पत्तिशिष्टया यागः साधनीय इति न तत्रैन्द्रवायवादिवोकेपे रसविषये गुणविधिः संभवति
त्यानर्थक्यं तेषां स्यात्। अभिषवादिविधिभिश्चोत्पत्तिशिष्टा लता न रसीकर्तुं शक्यते। तस्मादै
न्द्रवायवादिभिरेव यागविधिः। एवमग्नीषोमीयं पशुमालभेतेत्यपि यागविधौ सति उत्पत्ति
शिष्टपशुजातीयद्रव्यमेव यागसाधनमिति हृदयाद्यवदानवचनानि तत्र गुणविधित्वेना राम
ऽसंभवादनर्थकानि स्युः। अतो हृदयादिवाक्यविहितहृदयादिद्रव्यककर्मानुवादेन
देवताविधानमेतदिति वक्तव्यं। पशुशब्दो हृदयादीनां यागस्य वपाया मेदस इति मंत्रवर्णात्

यागप्रकृतित्वात्तेषामेव विकृतौ प्रकृतिवदुपचारादनुवादः । कथं पुनः कर्माणि हृदयादिवाक्ये विधी-
यते यान्यनूद्य देवताविधानं उच्यते । द्वावत्र पक्षौ । एकस्तावद्द्रव्यदानमात्रमत्र विधीयते । द्रव्यदेवता-
संयोगाभावात् प्रत्यक्षयज्यश्रवणाच्च । तदाक्षिप्तं तु स्पर्शेन मालमतिनानूद्यते । पशुशब्देन
हृदयादिप्रकृतिद्रव्यवाचिना उपचारान्नु हृदयादिद्रव्यं । अग्नीषोमीयपशब्देन तु प्रतिहृदयादि इव
अग्नीषोमीयपशौ न विहितेऽत्रैतावतो यागाः कल्प्यंत इति । अपरस्तु । अस्यापि देवतासंबंधश्रवणा-
हृदयाद्यवदानानां साध्यावदानप्रकृतित्वात्तद्देवयागसाधनत्वं हृदयादीनामपि एव
वपुरोडाशकवत्कल्प्यते । तेन यागानुवादेनैव देवताविधिरिति । तस्मात्समुदायानुवादो वितिप्रा-
सेऽभिधीयते । द्रव्यांतरेण संयोगात्रानुवादो हि कल्प्यते । तेन यागविधौ एतावन्मे गुणविधा-
यिनः । १ । पशुशब्दो हि जातिवचनो ऽतज्जातीयेषु हृदयादिषु विना कारणेन न लक्षणया वर्ति-
तुमर्हतीति श्रौतपशुविशिष्टयागविधानोपपत्तेः । न च पशुविशिष्टयागे विहितेन हृदयादि

38

वाक्यनां गुण विधित्वासंभवः पशोरेव हृदयादिद्वारेणकारणत्वोपपत्तेः। प्रजापतियेनयत्रि
यते। भवतितत्तस्यकेरणं। यथालोके। गोमयेन पचतीति। वेदेचनुपपत्तिकाभवति। यागेन स्वर्गमि
ति। तस्मादेको यागः पशुविशिष्टो ऽग्नीषोमीयदेवत्योविधीयते। हृदयादिवचनानितत्रैवसंस्कार
मात्रविधानानि। तथा सोमेनयजेतेतिसोमशब्दालतावचनः। नचासोप्रकृतेषु ऐन्द्रवायवादिया
गेषु हविष्ट्वेन विधातुं शक्यते। धारयाग्रहणातीति गुणवाक्येन संनिधापितस्य द्रव्यद्रव्यस्यैन्द्र
वायवमितितद्धितेन देवतासंबंधित्वेन प्रत्याभिधानात्तेतावद्धविर्विधानं। नापितत्प्रकरणान्या
येन नामधेयत्वं। सोमरसस्य प्रागस्माद्वचनादप्राप्तेः। ननु। ऐन्द्रवायवमितिप्रकृतानिधा
यीत द्धितो ऽभिषवादिवाक्यैः प्रकृतसोमरसमेवाभिधत्ते। मैवं। अत्रएव्याधारयाग्रहणातीत्य
नेनवाक्येनव्यवधानादभिषवादिवाक्यानामप्रकृतत्वाद्धा। समर्थद्रव्यमात्रमत्रप्रकृतं। रा२ यम २८
न्यच धाराबाक्यं सोमरसविषयं। [illegible] धारामात्रश्रवणात्। तन्मात्रेणैववाक्यार्थोपपत्तेः॥

सत्यपि सांनिध्ये तद्विषयत्वं धारावाक्यस्याप्रमाणकं। संस्कारवाक्येषु हि लौकिकस्य संस्कारा
नुपपत्तेः अपूर्वसाधनविशेषलक्षणया कथंचित्प्रकृतग्रहणं युक्तं। धारावाक्येनु ग्रहणोद्देश
न धारामात्रविधानात् न प्रकृतापेक्षा। किंचास्मिन्पक्षेऽयमपि नियमो नास्ति। यद्देव कथे सोमः
स एवाभिषवे। पयश्चाभिषवे स एव पावन इति। सर्वेषां अयादिवाक्यानां लौकिकसोमग्रह
णेनारादुपकारकत्वपादिविधायिनां नियोगानपेक्षित्वात्। नच प्रकरणाद्विशेषलाभः।
प्रकरणस्याविशेषकत्वात्। नाप्यधिकाराद्विशेषसिद्धिः। तुल्यत्वेनाधिकारः स्यादिति।
द्रव्यसंख्याहेतुसमुदायेमिति तत्र वक्ष्यति। यदि हि तं सोममभिषुणुयादिति च्छब्दः श्रूयेत
ततः सावैश्वदेवीति वत् प्रकृतग्रहणं भवेत्। सोममात्रश्रवणात्तु न प्रतीच्यागामित्वं। एवं
धारावाक्येपि चापि द्रवीयवादिवाक्येषु तु प्रकृतगामित्वपि धारा समर्थमेव द्रव्यांतरा द्य
ते। नच सोमरसः। तस्मात् प्रोक्षणादिषु क्रं। अतो न तत्प्रख्यन्यायेन नामधेयत्वं। एते नै

सोमस्य बुद्धिविपरिवृत्तेः ५

कदेशिनः संस्कारवाक्यैः सोमरसस्य प्राप्तिमभिदधाना निरस्ता वेदितव्याः। तेषां सिद्धां
तेष्वितथैव सोमप्राप्तेः सोमपदं नामधेयं स्यादित्यास्तां तावत्॥ एवं तावन्न ह विश्वेन विधानं
नापि नामध्येयत्वं सिद्धं मे। प्रकृते द्रव्यविधानं त्ववशिष्टं। तन्निराकरणार्थं चेदं सूत्रं। अश्रो
३९ दकाश्च संस्कारा इति। ये ये द्रवाय वादिवाक्येषु यागो विधीयेत तत्र तत्र स्यात् प्रकृते द्रव्यवि
धानं। तेषु तु ग्रहणमात्रमेव देवताविशिष्टं यागो विधीयते। तन्मात्रश्रवणात् संभवति च
ग्रहणेनैव द्रवायवं कुर्यादिति विधिः। ये ये ग्रहणमात्रेण तद्देवत्यता न भवति। यागसहिते
न तु ग्रहणेन शक्यते तद्देवत्यता कर्तुं। अतो देवताविशिष्टे ग्रहणे चोदिते यागमंतरे
ण तदनुपपत्तेर्यागापेक्षायां सोमेन यजेतेत्येतत् सर्वत्र द्रव्यदेवतासंबंधानुपपादयते
यागांतरकल्पनं निरूणद्धि। दशमुष्टीर्मिमीत इति च परिमाणश्रवणात् तावत्तश्च सो राम.
मस्याल्पपरिमाणैः पात्रैरसति समुद्ये ग्रहणासंभवात् यथा गृहीतानामेव च हो

राजस्यमेदध्यादिद्वादशैवाक्यानि

माद्युपपन्नं क्रमस्समुच्चयदर्शनं आश्विनो दशमो गृह्यते तं तृतीयं जुहोतीति। त्रयाणामपि
समुदायानुवादापवादाऽधिकरणेनापूर्वपक्षे कर्मभेदः सिद्धान्ते त्वभेद इति लक्षणस्सं
बंधः॥ ॥पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यात्॥ ॥गतोऽभ्यासप्रसंगः। संख्यया भेद इ
दानीमभिधीयते। अत्रैककर्मैक्यप्रतिवाक्यगता कर्मसमानाधिकरणा संख्योदाहरणं। यथा
द्वादश ५ तिस्र आहुतीर्जुहोति। द्वादशाज्जुहोतीति। तत्रैको होमो विधीयते बहवो वेति संदेहः। त
त्र। आख्यातस्य सकृच्छ्रुत्या कर्मैकत्वेऽवधारिते। संख्यासंपत्तिरभ्यासात् प्रयाजैकादशत्ववत्॥ ७॥
उच्यते। स्यादेवं यदि कर्मैक्यं प्रागस्मादवधारितं। आख्यातमात्रात्तु सिद्धो नावतऽभ्यासप्रमाण
ता। १। एकादश प्रयाजान्यजतीति निर्ज्ञातसंख्येषु प्रयाजेष्वभ्यासात्संख्यापूरणं यदभ्यासे
न प्रयत्नेन चैवमिह कर्मैकत्वं विज्ञातं। न ह्याख्यातमात्रं प्रमाणं। यतः कर्मैकत्वं प्रमितं स्या
त्। यावंति हि वाक्ये पदानि प्रयुज्यंते तावतां सह संप्रमाणत्वात्। अतो विरुध्येदाख्यातं संख्या

र्समानाधिकरण्यात् बहूनि कर्माणि श्रुतसंख्याविशिष्टानि विधत्त इति सिद्धान्ते भेदः। अत्र चैकमप्ये
वसंख्याश्रवणात् पूर्वपक्षाशंकामंदेति भवाभाष्यकारः सप्तदशप्राजापत्यानित्युदाहरत्।
अत्र हि द्रव्यगतया संख्यया नातीवस्फुटः कर्मभेद इति विचार्यते। किं सप्तदशपशुद्रव्यक
एकोयागो विधीयते· किं वैकैकपशुद्रव्यकाः सप्तदशैते यागा इति। तदर्थं च विचार्यते प्राजाप
त्यानिति प्र[illegible]त्या प्रजापतिर्देवताभिधीयते· तद्धितेन पशुद्रव्यं· बहुवचनेन बहुत्वं। तत्र
किं तद्धितार्थो बहुत्वेन प्रथममन्वितः· पश्वा प्रजापतिना देवतया संबध्यते· पशुश्च प
शुश्च पशुश्च पशवः· ते प्राजापतिर्देवतेति तदा बहुभिः पशुभिर्व्यासज्यैका देवता संबध्य
त इति द्रव्यदेवतासंबंधैक्यादेको यागो भवति। किं वा प्रथमं प्रजापतिनान्वितः पशुः प
श्चाद्बहुत्वेन संबध्यते· प्रजापतिर्देवता अस्येति· प्राजापत्यश्च प्राजापत्यश्च प्राजा
पत्यश्च प्राजापत्या बहव इति· तदा भिन्नैर्द्रव्यादेवतासंबंधैर्भिन्ना एव यागाः कल्प्यंते। राम ५०

40

तत्र प्राजापत्यशब्देन देवतासंबंधोपसर्जनं द्रव्यमेव प्राधान्येनोच्यते यच्च प्रधानं तस्यै
वार्थांतरेण बहुत्वेन संबंधो नोपसर्जनस्य देवतासंबंधस्य ननु देवताविशिष्टं द्रव्यम
भिहितमिति विशिष्टेन रूपेणासंख्यान्वयः स्यात् न स्वरूपमात्रेणा न। द्वौ त्र्यः इत्यत्रा नै
कांत्यात् न हि द्वावित्यत्र द्वित्वविशिष्टेन रूपेण द्विवचनाभिहितसंख्यायोगः। तथा सति द्वा
विति च स्वार्थः प्रतीयेरन्। एवं त्र्यः इति नवा न च तथा। तस्मात् यथा द्वित्वविशिष्टमपि द्रव्यं द्विश
ब्देनोक्तं स्वरूपेणैव द्विवचनाभिहितसंख्यायोगं प्रतिपद्यते तथाऽत्रापि तद्धिताभिहि
तं द्रव्यं स्वरूपेणैव बहुत्वं प्रतिपद्यते न तु सोपसर्जनं। तस्मादेकं कर्म सप्तदश पशुद्रव्य
कं। कथमिदानीं चोदकप्राप्तं एकपशुनिष्पन्नैकादशावदानद्रव्यसंयोगस्यानुग्रहीतव्यं
मानुग्राहि। न चोदकानुसारी पदेशनिर्णयो यथापदेशं वर्ति देशवर्णनात् तस्मादेकं
कर्मेति प्राप्ते ब्रूमः॥ यदि कर्ममेवदेकमेकः स्यात् चोदकस्ततः। तेन चैकगणप्राप्तेः पशुसं

५१

रव्याविरुध्यते।१।सवनीयविकाराश्चैकादशिनाः तद्विकाराश्च प्राजापत्याः।तत्रचैकपशुनिष्पन्नै
कादशावदानद्रव्यकं यागस्यासीदित्यत्रापि एकत्वे यागस्य चोदकोप्येकमेवावदानगणम
तिदिशेत्।तस्मादत्रसप्तदशानां प्राजापत्यत्वं न संपादितं स्यात्।न चोपदेशेनातिदेशस्यबा
धः।विरोधाभावात्।प्राजापत्यानिस्तु [redacted]
पदेशस्योभयथाप्युपपत्तेः।तेनत्र्यर्थद्वयसाधारणमुपदेशवाक्यं प्रकृतिव
द्भवेदनवाक्यशेषभूतेनानेककर्मपरमवधार्यते।कर्मभेदे हि प्रतिकर्मभिन्नेष्वोदके
स्तावतां गणानां प्राप्तेः सिद्ध्यति सर्वेषां प्राजापत्यत्वं।एवं वसंतायकपिंजलानालभेत इत्या
दिषु पित्र्यादिकवशेन तयावद्द्रव्यं यागभेदः।यत्तु चोदकमनाहत्य द्रव्यस्यतद्धिताभिहि
तस्यविशिष्टस्यैव बहुत्वावगमात्भेदमाहुः तेषां चतुर्थ्यभिहितदेवतेषु वसंतायकपिंज राम
लानित्यादिषु न कर्मभेदः सिद्ध्येत्।तत्रचप्रतिपश्ववदानगणप्राप्तिर्नस्यात्।अथतत्रचोद ८१

कवशात् भेदः तत्तस्तोषेवसर्वत्रास्त्र किमव्यापिनातद्धितोपन्यासेनेत्यास्तांतावत्॥ ॥
संज्ञाचोत्पत्तिसंयोगात्॥ ॥उद्देशक्रमस्याऽतंत्रत्वात् बकुविचारं गुणप्रकरणांतरे निमि
त्तं भेदमुपेक्ष्य संप्रतिसंज्ञातो भेदोभिधीयते। ज्योतिष्टोमंप्रकृत्य श्रूयते। अथैषज्यो
तिः अथैषविश्वज्योतिः अथैषसर्वज्योतिरेतेनसहस्रदक्षिणेन यजेतेति। तत्रैतत्श
ब्दपरामृष्टानां ज्योतिरादीनां यजिना समानाधिकरण्यात् यागनामत्वं तावत्सिद्धं।
तत्र संशयः। किं प्रकृतमेव ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गु
णो विधीयते। उत कर्मांतराण्येवं नामकान्येव दक्षिणानि विधीयंते इति। तत्र प्रकरणा
देतत्शब्दस्य प्रकृताभिधायित्वात् सामानाधिकरण्याच्च ज्योतिरादीनां प्रकृत हान्यप्रकृत त२
कल्पनायोगाच्च पूर्वस्यैव गुणविधिरिति प्राप्ते ब्रूमः नामांतरश्रुतावर्थभेदस्तावत्प्रतीयते।
बलवद्बाधकाभावात्सावन्यथा त्वं प्रपद्यते। ॥न चात्र बलवदस्ति बाधकं। येन संज्ञांतरवि

मित्तोभेदोऽपोद्यते। संज्ञाभ्यासात्याचार्थांतराववगमात् प्रकारणविच्छेदे जातेऽर्थांतर कलुषितायां बुद्ध
वुपनिपतत्सहस्रदक्षिणेन यजेतेतिनज्योतिष्टोमं गंतुमर्हति। तस्मात्कर्मांतराणि। एवं चार्थेप
ज्योतिरित्यादेरर्थवत्त्वं। अन्यथानर्थक्यंस्यात्। एतेनसहस्रदक्षिणेनैतावतैवज्योतिष्टोम
तिर्थ स्यगुणविधिःसिद्धेः। रेतच्छब्दश्चप्रज्ञायमानकर्मांतरवचनत्वेनाप्युपपद्यत इति सिद्धः कर्मभेदः॥
॥गुणश्चापूर्वसंयोगेवाक्ययोःसमत्वात्॥ ॥इदानींगुणलक्षणोभेदः प्रस्तूयते। द्वेधा च गुण
स्यभेदकत्वं। कश्चित्तावत् गुणः पूर्वविहितस्य कर्मणः प्रबलगुणावरुद्धत्वात्तत्रनिवेशम
लभमानः स्वात्मसंगतयेविधेःकर्मांतरोत्पत्तिपरतां कल्पयन्भेदको भवति। अनेकत्वा
द्वा गुणानां प्राप्तकर्मानुवादेन विध्ययोगात् सर्वेषां विधिसिद्धये विधेः कर्मपरत्वं कल्प्य
ते। तत्रानेकगुणनिमित्तो भेदः पौर्णमास्येधिकरणएव प्रसंगात् प्रतिपादितः। अधुना रामः ८२
बलवद्विरोधनिमित्तो भेदोऽभिधीयते। चातुर्मास्येषु वैश्वदेव्यामिक्षेतियागविधा

यान्नायत्तेवाजिभ्योवाजिनमिति।तत्रसंशयः।किंपूर्वस्मिन्नेवामिक्षायागेवाजिनंगुणोविधी
यते·किंवाकर्मांतरमिति।तदर्थंचकिमुत्पत्त्युत्पन्नशिष्टौगुणौतुल्यबलावुतोत्पत्तिशिष्टोब
लीयानिति।तथातद्धितश्चतुर्थ्योश्चपिबलाबलंचिंतनीयं।तत्रवाजेनामिक्षयायोगाद्विश्वे
देवाहिवाजिनः।प्रकृतांसान्नाय्यदेवतायांवाजिशब्दश्चयौगिकः।१।तेहिपूर्वविहितकर्म
संप्रदानरूपेणप्रकृतास्तेनैवरूपेणात्रप्रत्यभिज्ञायंते।तथाविधेष्वतेःसंबध्यमानं
वाजिनंपूर्वकर्मण्येवविहितंभवति।एवंचसंभवतिपूर्वत्रगुणमात्रविधानेप्रकृतहानेऽप्र प्र
कृतकल्पनंअपूर्वांतरकल्पनंविशिष्टविधिगौरवंचनाश्रयितुंयुक्तं।नन्वामिक्षायुक्तस्यै
वपूर्वकर्मणउत्पत्तावेवगतत्वात्।ननुतस्यद्रव्यांतरसंबंधापेक्षायोग्यतावास्ति।उच्यते।यद्य
प्युत्पत्तौद्रव्ययुक्तंकर्मावधारितंतथापीहनिष्कृष्यकर्मस्वरूपमात्रमनूद्यतेऽभिधान
कृताचाकांक्षा·नवस्तुकृता।तेनस्वरूपमात्रस्याभिधानोपात्तस्यास्त्येवद्रव्यांतरसंबंधा

पेक्षा। योग्यता चास्यैव स्वरूपमात्रस्य द्रव्यांतरेण संबंधुं। शब्दांतराधिकरणे हि प्रत्ययवाच्यामा
वना प्रकृत्यर्थानुरक्तैवगम्यते न पुनः स्वरूपेति तत्र यथावधीतरमनवकाशं स्यादित्युक्तं। इह तूक्त
त्वात् तेन यजिना गुणाननुरक्ते न पि कर्मावगतं पदांतरस्वात् इत्युच्यते। अतस्तादनुवादेन श
क्यं गुणांतरविधानं। अतो नानयोरुत्पत्त्युत्पन्नशिष्टयोर्विरोधः। न चामिक्षायादेवतासंबंध
स्य श्रौतत्वाद्वाक्यगम्याद्वाजिनसंबंधाद्बलीयस्त्वमिति वाच्यं। उभयोर्वाक्यगम्यत्वात्। न
ह्यामिक्षायादेवतासंबंधो वैश्वदेवीपदेन केवलेनावगम्यते। किं त्वामिक्षापदैकवाक्यतया।
तस्माद् उभयोस्तुल्यबलत्वात् सर्वस्मिन्नेव कर्मणि विकल्पः समुच्चयो वेति प्राप्तेऽभिधीयते।
आमिक्षाया बलीयस्त्वमुत्पत्तौ चोदनाश्रुतेः। उत्पन्ने वाजिनं वाक्यात् तेन तद्दुर्बलं मतं।
।१। यत्तु सगुणा सन्नमपि कर्म स्वरूपमात्रेण निष्कृष्य शक्यं गुणांतरं विधातुमित्युक्तं तदयु राम
क्तं। तत्र यद्यप्यभिधानतः स्वरूपमात्रं निष्कृष्यते तथापि तस्योत्पत्तिवाक्यावगतस्यानुवा ८२

दात्तस्वरूपमालोच्यमानमेव गुणयुक्तमेव गम्यते। ततश्चानेराकांक्ष्यादयोग्यत्वाच्च गुणांतर
मत्रनिवेशमलभमानमात्मनि निवेशक्षमकर्मांतरोत्पत्तिं सूचयति। श्रोतश्चामिक्षा याविष्वे दे
वैः संबंधः। तद्धितस्य देवताविशिष्टद्रव्यवाचिनः पदांतरोपस्थापितद्रव्यविशेषवचनत्वात्। पद
वाजिभ्य इति चतुर्थी संप्रदानमात्रं वदति। ननु तद्विशिष्टद्रव्यं वाक्यात्तु तत्संबंध इति दुर्ब
लत्वात् प्रपंचितं चैतद्वार्त्तिक एव। अन्ये च बहवः संनिकर्षविप्रकर्षप्रकारास्तत्रैव द्रष्टव्याः।
तस्मादामिक्षावरुद्धे पूर्वकर्मण्यप्रसंभवन्निवेशाद्वाजिनगुणात्कर्मभेद इति॥ ॥अगुणे
तु कर्मशब्द इति॥ ॥प्रत्युदाहरणसूत्रं॥ अथवा अधिकरणांतरं॥ अगुणे तु कर्मशब्द
इति॥ अग्निहोत्रं जुहोतीति निर्गुणं कर्मोत्पन्नं। तत्संनिधौ च दध्ना जुहोति पयसा जुहो
तीत्यादयो वहवो गुणाः श्रूयमाणाः पूर्वकर्मनिवेशे सति विकल्पप्रसंगात्। अन्यतराव
रुद्धे चान्यतरस्य निवेशासंभवात् पूर्ववदेव कर्मांतरं कल्पयंतीति प्राप्ते ब्रूमः॥ सर्वेषा

मभीष्टमन्योन्यानालोचनेनाऽग्निहोत्रवाक्यमात्रालोचनात्तत्र निर्गुणस्य कर्मणो
वगतस्य सर्वगुणयोग्यत्वात्· पौर्वापर्याभावाच्चान्यावरुद्धेन्य स्यान्निवेशइत्यभा
वात्तत्रैव गुणमात्रविधानं प्रमाणवशाच्चेति न्यायः॥ फलश्रुतेस्तु कर्म स्यात् फलस्य
कर्मयोगित्वात्॥ अग्निहोत्रं प्रकृत्य दध्नेन्द्रियकामस्य जुहुयादिति श्रूयते। तत्र संशयः।
किमग्निहोत्रात्कर्मान्तरं दधिविशिष्टमिन्द्रियकामाय विधीयते· उत तत्रैव गुणमात्रं
फलाय विधीयते इति। तदर्थमिदं विचार्यते। किं कर्मणः फलमिदं उत गुणादिति।
यदि कर्मणस्ततः प्राप्तस्य कर्मणः फलसंबंधं गुणसंबंधं चैकं वाक्यं न शक्नोति वि
धातुमिति कर्मान्तरं स्यात्। गुणफलसंबंधे तु तन्मात्रवाक्येन विधीयते· दधिहोम
संबंधस्याश्रयाश्रयिरूपः प्रकरणप्राप्तोऽनूद्यमानो न वाक्यं भिनत्तीति सि राम ४४
ध्यत्येकवाक्यत्वं अकर्मान्तरत्वेपि। तेन भेदाभ्युदेसिध्यर्थं कर्मणः फलं उत गुणादि

तिचिंत्यते।सत्यपिपक्षद्वयेपिभावनाभेदेधात्वर्थभेदाभेदइतिचारात्क्षक्षणसंबंधः।
तत्र।धात्वर्थात्फलमित्युक्तंभावनासंनिकर्षतः।विप्रकृष्टस्यतुनामार्थस्यतदर्थेनिष्प
न्नत्वाच्चयी।१।भावार्थाधिकरणेह्येतदुक्तं-यथा-धात्वर्थात्फलं-नतुनामार्थात्-स
तुधात्वर्थस्यैवांगमिति।तदिहापि-दधिहोमार्थे-होमःफलार्थः।किंचादध्यादेःफल
संबंधेजुहोतिस्यादनर्थकः।यदिसोपिविधीयेतवाक्यभेदःप्रसज्यते।१।नचैकेवा
क्यंफलेहोमेचशक्नोतिदधिविधातुं।तत्रास्तिहोमसंबंधेजुहोतीतिपदमनर्थ
कं।तस्यचदध्नासहक्रियाकारकभावोगम्यमानःपरित्यक्तःस्यात्।तस्मात्होम
स्यैवफलेविधानंगुणविशिष्टस्येतिप्राप्तेब्रूमः।धात्वर्थस्यान्यतःप्राप्तेर्गुणमात्रं
विधीयते।विधेयंयच्चतत्तेनैवफलेनान्वेनयुज्यते।१।तत्रैवहिभावार्थाधिकरणन्या
यायत्रधात्वर्थानामार्थश्रोत्रमपिविधीयते।अत्रतुप्राप्तहेनधात्वर्थस्याविधे

त्वाद्गुणमात्रं विधीयते। विधेयस्यैव फलसंबंधो नाविधेयस्य। तेन गुणस्यैव फलं। ननु
कर्मान्तरं विधेयं भविष्यति। नापि प्रकृतहानाऽप्रकृतकल्पनविशिष्टविधिगौरवम
वर्थलक्षणादिदोषप्रसंगः। अतो गुणमात्रविधानात्तस्यैव फलं। जुहोतेरिदानीं कथ
मन्वयः॥ केचिदाहुः। कर्मापि न भेवद्दधिफलकामस्य विधीयते। न दधिमात्रं अ
भावार्थस्य विधिविषयत्वायोगात्। अतो दध्यनुरक्तो होम एव विधीयते। न चैवं वाक्य
भेदः। दध्नो विधानाभावात्। लौकिकं हि क्रियाकारकलक्षणसंबंधमाश्रित्य शुद्ध
व्याणां क्रियापत्तिः। न पुनस्तादर्थ्यं। कर्मणोऽकारकत्वप्रसंगात्। अतः फलार्थत्वेन
होमे कारकीभूतस्य दध्नः प्रतीयते। न होमार्थत्वं होमार्थत्वे तत्रापि विधिव्यापारा
त् वाक्यभेदः स्यात्। न तु तदस्ति। तेन होमाश्रितस्य दधिव्यापारस्य फले विधानात्
वाक्यभेदं विनैव सिद्धो जुहोत्यन्वयः। तत्रेदं वक्तव्यं। यदि न दधि विधीयते किंतु
कर्मणो दध्युद्देश्यत्वेन दध्न आश्रयत्वपरका कारकत्वप्रसंगात् ४

रामः ५

र्थं च विधीयते। होम एव दध्यनुरक्तः फलाय विधीयते इति चेत्। एवं तर्हि होम एव फ
लार्थः स्यात्. दधि तु होमगतदध्यनुरागसंपत्त्यर्थं उपादीयमानं तदर्थमेवस्या
त् न फलार्थी। अपि च माभूद्दध्नो विधानं. तदनुरागस्तु प्राप्तस्य कर्मणो विधीयते फ
लसंबंधश्चेति वाक्यभेदः। ननु न ब्रूमो दध्नो न विधानमिति. किंतु होमार्थतया
न विधीयते. फलार्थत[illegible]या होमाश्रितं विधीयते. होमे कारकीभूतमित्यर्थः। उच्य
ते। दध्नेति दधिविशिष्टकरणमात्रं पदेनोच्यते। होमे नु तत्कारकमिति कुतोऽवगम्य
ते। वाक्यादिति चेत्। एवं सत्याश्रयसंबंधं फलसंबंधं च बोधयतो वाक्यं भिद्येत।
ननु लोकसिद्धमेव क्रियाकारकलक्षणमाश्रयाश्रयिलक्षणं संबंधमुपादाय के
वलफलसंबंधकरणान्न वाक्यभेदः। नैतदेवं। लोकतो हि क्रियाकारकयोः संबं
धः संभवमात्रेण सिद्धो न तु कर्तव्यतया। कर्तव्यतया चात्र दधिहोमसंबंधः श्रूयते

46

दध्नाजुहुयादिति। तेन तस्य कर्तव्यता फलसंबंधश्चेति वाक्यभेदः। तथाहि दध्नेंद्रि
यकामस्य जुहुयादिसत्र। न तावत्य इंद्रियकामः स दध्ना जुहुयादिति वचनव्य
क्तिः संभवति। होमस्याविधेयत्वात्। विधाने च कर्मांतरापत्तेः। अतो जुहुयादिति ता
वदनुवादः तत्र। यज्जुहुयात् तद्दध्नेति च इंद्रियकामस्य च वाक्यभेदः। अथ यद्द
ध्ना जुहुयात् तदिंद्रियकामस्येति। तदयुक्तं। नहि सत्यपि संभवे दध्ना होतव्य प्राप्तं य
दनूद्येत। अथ यदिंद्रियकामस्य जुहुयात् तद्दध्ना। तदप्ययुक्तं। इंद्रियकामोऽर्थ
न होमस्याप्राप्तत्वात्। अथ मन्येत यद्यपि इंद्रियकामस्य इंद्रियकाम... त्वरूपेण हो
मो न प्राप्त इंद्रियार्थे नेति यावत्। तथापि पुरुषाणां बहुकामत्वात् कदाचिदग्निहोत्रा
वस्थायामपि संभवति इंद्रिये पुरुषस्य कामना। तेनेंद्रियकामनोपलक्षितस्य पुरु
षस्य कदाचित् प्राप्त एव होम इति तदनुवादेन दधिविधीयत इति। तदयुक्तं। काम

राम
९८

शाव्दस्यकाम्यस्वरूपाभिधायिनःपुरुषस्वरूपपरत्वेलक्षणाप्रसंगात्।अपिचैवंनफला
र्थंदधिस्यात्·किंत्विंद्रियकामनायांनिमित्तेनैमित्तिकेऽवंगंस्यात्।विवरणकारस्य
तुअपूर्वान्तरानभ्युपगमात्केवलपूर्वान्वितस्यैवगुणस्यफलार्थत्वात्अपूर्वसंबंधस्य
चलोकतःसिद्ध्यभावात्सुतरांवाक्यभेदःस्यात्।तस्मान्नहोमसंबद्धंदधिवाक्येन
विधीयते·अपितुदध्नेत्येतावन्मात्रं·यइंद्रियकामःसदध्नेति।कथंतर्हिजुहोतेरन्वयः।
उच्यते।दध्नेतिकरणत्वेनैतंदधिफलायविधीयते·तृतीयानिर्देशात्।क्रियापेक्षंचका
रकमितिक्रियाविशेषापेक्षायांसन्निहितलक्षणप्रकरणप्राप्तोहोमसंबंधोजुहोति
नानूद्यते।ननुउद्भिदादिवत्फलभावनापेक्षमेवकरणत्वंभविष्यतिनक्रियां
तरमपेक्षते।उच्यते।नधात्वर्थवद्दध्यादेःसिद्धस्वभावस्यस्वरूपेणफलभावनाक
रणत्वमुपपद्यते।कर्तृव्यापारविषयस्यहिकरणत्वं।दध्यादेश्चकंचिद्धात्वर्थंप्र

२वदृष्टादेः सिद्धस्वभावस्यापि स्वरूपेण संभवेत् तथापि दृष्टार्थव्यापारविषयतार

तिकारकीभवतः कर्तृव्यापारविषयता · न स्वरूपेण यागादिवत् · इत्यस्ति धात्वर्थविशेषा
पेक्षा यद्यपि चादृष्टोपकारकप्रयाजादिव्यापारविषयता यागादिसिद्ध्यर्थं कारकभाव
मपेक्षते। अवश्यं च दृष्टद्वारेणापि कर्तृव्यापारविषयता करणस्यांगीकर्तव्या। अन्य
थाऽदृष्टार्थोगमात्रानुष्ठानात् करणं प्रति पुरुषव्यापाराभावात् करणोपदेशवैयर्थ्यं स्यात्।
तस्मात्तु विभक्त्यभिहितकारके विशिष्टं दध्यादि विशिष्टं वा कारकं · प्रत्ययार्थप्राधान्या
त् फलाय विधीयते। फलभावनाकरणत्वं च यागादिवदेव समभिव्याहारात् सिद्धं न वि
भक्त्यभिधानमपेक्षते। कारकभावश्च क्रियाविशेषापेक्ष इति संनिधिवशप्राप्तो होमो
त्रधातुनानूद्यत इति सिध्यति जुहोतेरन्वयः। कारकभावश्चैकपदोपात्तः क्रियावि राम
शेषसंबंधश्च संनिधिप्राप्तः फलान्वय एव वाक्येन विधीयते इति न वाक्यभे ८७
दः॥ सप्रेषु कर्मयुक्तं स्यात्॥ ॥त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंश

उ॰सं॰तं॰विधिः१ प्रयोगविधिः१

मग्निष्टोमसामकृत्वाब्रह्मवर्चसकामोयजेतेति अग्निष्टुत्संज्ञकंयागंविधाय तस्यचप्राकरणि
केनवारवन्तीयमग्निष्टोमसामकार्यमितिवाक्येनगुणंविधायपुनराम्नातं एतस्यैवरेवतीषुवा ५२
रवन्तीयमग्निष्टोमसामकृत्वापशुकामोह्येतेनयजेतेति। तत्रापिपूर्ववत्संशयः। किंपूर्वस्मिन्नेवाग्नि
ष्टुत्संज्ञकेयागेपशुफलार्थत्वेनरेवत्याधारंवारवन्तीयंगुणोविधीयतेउतकर्मान्तरमिति। तदर्थ
मिदंविचार्यते। किंफलार्थस्यवारवन्तीयस्यप्रकृतौयागंप्रत्याश्रयीभवितुंशक्नोतिनवेति। तत्रपू
र्ववदत्रापिगुणमात्रंविधीयते। फलायनतुयागस्यविधानंविधिगौरवात्। १। सामाश्रयत्वं
यागस्यसाक्षाद्यद्यप्यसंभवितथापिस्तोत्रनिर्वर्त्तिद्वारातदुपपद्यते। २। विशिष्टयागान्तरविधौ
विधिगौरवात्प्रकृतहानाप्रकृतकल्पनादोषाच्चतत्रैवरेवत्याधारंवारवन्तीयंफलायविधीयते।
यद्यपिद्रव्यदेवतासाधनकोयागःसाम्नासाक्षात्साधयितुंनशक्यतइतिनसाक्षात्साम्नःप्रकृ

५८

ताश्च यत्वं संभवति। तथाप्यानर्थक्यात्तदंगेष्विस्यंगभूतस्तोत्रनिर्वृत्तिद्वारेण यागसाधनत्वं सा
म्नः संभवतीति युक्तं प्रकृते ताश्च पक्षांतरे नन्वेवं रेवतीवारवंतीयसंबंधः फलसंबंधश्चेति अनेकार्थ
त्वात् वाक्यभेदः स्यात् नैष दोषः। यदि संबंधद्वयमपि विधिवशेनैव बोधयितव्यं स्यात् स्या
त् वाक्यभेदः कत्वाशब्देनैव तु रेवतीवारवंतीयसंबंधे प्रतीते केवलफलसंबंध एव यजे
परैकाल्लिङ्‌प्रत्ययेन प्रतिपादयितव्य इति न वाक्यभेदः। यथा विशिष्टाऽपूर्वकर्मविधौ तस्य विशि
ष्टस्य संबंधे विभक्त्यादिभिरेव सिद्धे तादृशस्य फले विधानाद न वाक्यभेदः। यः फलं कुर्यात् स ईदृशे
न यागेनेति तद्वदिहापि यः पशून् कुर्यात् रेवतीषु वारवंतीयकरणेनेति न वाक्यभेदः। तस्मात्
फलाय गुणमात्रविधिः। यजिस्तु विपरिवृत्तिप्राप्तपूर्वयागानुवादः। १ तच्छब्दोपि षष्ठ्यंतः पूर्वस्य राम ५८
यागस्य फलवता गुणेन सहाश्रयाश्रयिसंबंधं सन्निधिलब्धमनुवदति। अग्निष्टोमसामश
ब्देपि आनर्थक्यात्तदंगेष्विति न्यायप्राप्तस्तोत्रसंबंधानुवादः। यद्यपि तत्रान्यानि बहूनि स्तोत्रा

ण्याज्यपृष्ठादीनि संतितथापि वारवंतीयस्य कृत्वर्थस्याग्निष्टोमस्तोत्रमेवस्थानं दृष्टमिति फला
र्थस्यापि तद्देवस्थानं भविष्यतीति तस्मादेषां प्राप्तत्वेनाविधेयत्वात्तन वाक्यभेद इति प्राप्तेभिधीय
ते॥ प्रकृतं कर्मगत्वा तिफलाय विहितो गुणः। यत्र तत्र गुणांकोभोयागः साम्नानसाध्यते॥१॥ कार
कभावापत्तिर्हि तदाश्रयत्वात् तदपि प्रकरणाप्रात्समनुवदितव्या। वाक्येनाप्युपसंबधकरणेवा
क्यभेदात्॥ तेन यत्र प्रकृते कर्मणि फलार्थस्य गुणस्य कारकभावः संभवति तत्रैव गुणानां कामो
यथा दध्नेंद्रियकामस्येति॥ न हि ह प्रकृतयागे कारकत्वं साम्नः संभवति· संभवति तु तदंगभूते
स्तोत्रे कारकत्वं· ननु न प्रकृतं· प्राप्तिदर्शिकत्वादिह स्तोत्राणां। न चायमानर्थक्यात्तदंगन्यायस्य
विषयः। यो हि कर्मांगत्वेन गुणश्चोद्यते स तत्र साक्षादसंभवन् तदंगे निविशते संभवति स्यंगद्वारे
णाप्युपकारकत्वं· न तथाऽत्र यत्वमंगद्वारेण संभवति। न ह्यंगे कारकं भवत्प्रधाने कारकं भवति
साम्नश्चगीतिरूपक्रियात्वात् यागादिवत्तनाश्रयापेक्षा। यतः प्रकृतक्रियासंबंधः स्यात्। ननु नाव

प्रयंकारकत येवतदाश्रयत्वं· संबंधांतरेणाप्युपपत्तेः। तेन क्त्वाशब्देन क्रियांतरसमानकर्तृकतया
गम्यमानं रेवतीवारवंतीयसंबंधकरणं फलाय विधीयते। किंतु क्रियांतरमित्यपेक्षायां सं
निधानाद्यागोलभ्यते। एवमप्यग्निष्टोमसामेति नावकल्प्यते· अनुवादत्वासंभवात् विधा
नेचवाक्यभेदात्। नच क्त्वार्थस्य वारवंतीयस्य यज्ञायज्ञीयस्थानं तदेव पुरस्तात्पार्थस्यापि भवतीति प्र
माणमस्ति· यतोग्निष्टोमसामेत्यनूद्यते। किंच रेवतीषु वारवंतीयं कृत्वा पश्वनुभावयेदित्युक्ते
पश्वनुभावनापेक्षयेव समानकर्तृकत्वसंभवात् न क्रियांतरापेक्षायतः संनिहितो यागः
संबध्येत। तस्माद्गुणफलसंबंधविधौ यज्ञेनेति वाग्निष्टोमसामेति च द्वावपि शब्दौ प्रकरण
प्राप्तानुवादत्वासंभवाद्विधाने च वाक्यभेदादनर्थकौ स्याताम्। तस्मात्क्त्वाशब्दकल्पितरे
वतीवारवंतीयसंबंधविशेषितः पूर्वो यागः फलाय विधीयते। तत्र सामत्वः प्रकृतितोग्नि
ष्टोमस्तोत्रस्यानप्राप्तेस्तादनुबद्धा रेवत्यापितस्यानाभवंतीतेनाग्निष्टोमसामेत्यनुवादः। रामः

एतच्छब्दोपि प्रस्तूयमानापूर्वयागवचनः। रेवतीषु वारवन्तीयं कृत्वा पशुकामो यजेतेत्येता
वन्मात्रं विधीयत इति लाघवं एकवाक्यत्वं च लभ्यते तत्र अपूर्वकर्मविधौ गुणफलसंबंधविधौ
तु यजुपादेरानर्थक्यं वाक्यभेदो वा स्यादित्युक्तं। येन तु गुणफलाधिकारेष्वपि वाक्येनैव गुणस्या
प्यसंबंधमभ्युपगच्छन्तः कर्मैव गुणानुरक्तं फलाय विधीयते न वाक्येनेत्याहुः तेषामत्रा
पि रेवतीवारवन्तीयसाधनकाग्निष्टोमस्तोत्रविशिष्टस्य प्रकृतस्यैव यागस्य पदध्यनुरक्तस्य
वहोमस्य फले विधिसंभवान्न सिद्धान्तहानिः। ननु तत्र दध्यनुरागो होमस्य लोकसिद्धो लभ्य
ते केवलस्य फलसंबंधो वाक्येन विधीयते इह तु यद्यपि सवकसामयोः स्तोत्रसाधनत्वं
लौकिकं स्तोत्रस्य तु यागविशेषणत्वं न लोकतः सिद्ध्यति विधिवशादेव तु लभ्यं ततश्च
तस्य च फलसंबंधस्य च विधानात् तु वाक्यभेदः स्यात् सत्यं न लोकतः सिद्धं अतिदेशतस्तु
सिद्धं स्तोत्रस्य पूर्वयागाङ्गत्वेन तद्विशेषणत्वं। स्तोत्रविशेषणत्वं च सवकसामयोर्लौकिकतः सिद्धं।

तदेवं सकृत्साम विशेषितस्तोत्रानुरागं यागस्यान्यतः सिद्धमुपादाय केवलफलसंबंधमात्र
विधिनाऽनेन बोध्यत इति कुतो वाक्यभेदः। किं च कृताशब्देन स्तोत्रसमानकर्तृकत्वमेव याग
स्योच्यते। न तत्कारकत्वं तादर्थ्यं वा। समानकर्तृकत्वं च लोकसिद्धमेव लभ्यत इति दध्या
दिभिरविशेषः। अग्नेरेवत्यां वारवन्तीयसाधनकाग्निष्टोमस्तोत्रसमानकर्तृकत्वविशिष्टः प्र
कृत एव यागः फलाय विधातुं शक्यते। आग्नेयद्वाग्निष्टोमस्तोत्रमेवातिदेशप्राप्तं रेवतीवारवन्तीया
५० नुरक्तं पशुकामस्य विधीयतां। यजिपरस्यापि विधेः स्तोत्रविषयत्वं न दुष्यति निर्वापपदे २५
स्येव द्रव्यदेवतासंबंधविषयत्वं। यजेरपि निर्वपतिवदनुवादत्वात्। न तस्या ह्यवयवेनाश्रय
संबंधे सिद्धांतहानिरित्यास्तां तावत्॥ ॥सोमरे पुरुषपश्चात्तेनिधिनेकामसंयोगः॥ ॥योवृ राम ५०
ष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौमरेण स्तुवीतेति ब्रह्मसामाख्यं स्तोत्रं प्र
कृत्य तदाश्रयं सौमरं फलत्रयसाधनत्वेनाम्नातं। यद्यपि च सौमरस्य साम्नो गीत्यात्म

कक्रियात्वाद्द्वारवंतीयवत्त्राश्रयापेक्षा॰ तथापि स्तुवीतेत्यनेनैकवाक्यत्वात्साधनभूत
स्यैव फले विधानं विज्ञायते। तथाहि यावंति पदानि वाक्ये प्रयुज्यंते तावतां यथान्वयमेवेति
तथा वाक्यार्थविवर्णनीयः। तद्यदि सोमरमात्रं विधीयेत॰ तत स्तुवीतेत्यनर्थकं स्यात्
त्कृत्यंतरविधाने गौरवं मत्वर्थलक्षणा च स्यात्। अतः सोमरेत्येकपदोपात्तं सोमरवि
शिष्टं करणकारकं फले विधीयते। करणं च क्रियापेक्षमिति युक्तं प्रकृतस्तोत्राश्रयत्वेन वा
रवंतीयं तु द्वितीयांतत्वात् न करणीभूतमवगम्यते। किं तर्हि कर्मीभूतं। न च स्तोत्रे यागे वा
स्मान्नः कर्मत्वं संभवति। तेन कृत्यो शब्दार्थमात्रं प्रति कर्मत्वात् न क्रियांतरापेक्षेति वैषम्य।
तदेव फलत्रयसाधनभूतं सोमरं प्रकृत्याम्नंति॰ हीषिति वृष्टिकामाय निधनं कुर्यात् -
ऊर्गित्यन्नाद्यकामाय॰ ऊ इति स्वर्गकामायेति। तत्र संशयः। किं हीषादयो निधनविशेषाः
सोमरफलात् फलांतरार्थेन विधीयंते उत सोमरस्यैव तत्तत्फलं साधयतः तत्तन्निधनम्

नियमेन पाठतः प्राप्तं नियम्यत इति। तदर्थं च किं वृष्टिकामादिशब्दोक्तपुरुषशेषत्वेनेते सा
क्षाद्विधीयंते। अथवा तत्साधनशेषत्वेनेति। तत्र पुरुषस्य श्रोतत्वात् तादर्थ्यमेव हीषादीनां स्तु
र्थ्यावि ज्ञायते। तच्छेषता च तदभिलषितसाधनतयेति फलार्थत्वमेवैषां। साधनसंबंधे
तु वृष्टिकामादिशब्दैः सोमरं लक्ष्यते। न च श्रुतिसंभवे लक्षणा युक्ता। तस्माद्धीषादयो गु
णाः फलांतरार्था इति प्राप्ते ब्रूमः। वृष्ट्यादीनि परोक्षाण्येव विपरिवर्तमानानि प्रत्यभिज्ञाय
51 त इति न फलांतरावगमः। किंच। हीषितिशब्दमात्रे फलाय विहिते सति आश्रयापेक्षायां प
तावत्सोमरं प्रकृतं न तच्छ्रूतौ त्याश्रयत्वं प्रतिपत्तुं यन्नु तदवयवभूतं निधनं न तत्प्रकृतानां
चानर्थक्यं तदंगन्याय्यस्यायं विषय इत्युक्तं। सत्यपि च तदंगावतरे पोऽनेकावयवत्वान्न साम ५१
नियमेन निधनसंबंधः। तत्र निधनमियमनर्थकं स्यात्। विधाने च वाक्यभेदः। तस्माद्वृ
ष्टिकामादिशब्दलक्षिते सोमरे निधनत्वेनैवाऽनियमप्राप्ता हीषादयो नियम्यंते। अ

ण वा लक्षणया विनैवात्र विधीयते। न हि यदेव फलस्योपकारकं तस्यैव पुरुषशेषत्वं। तदंगस्यापि
तद्द्वारेणास्त्येव पुरुषशेषता। तथा चान्यत्रापि प्रयोगो दृश्यते। तत्स्विष्टकृदादीनां नाराशंसो द्वि
तीयः प्रयाज इत्यादि। तेन हौपादयः सोमस्यांगभूतास्तद्द्वारेणावभृथिकामादीनां पुरुषाणां
प्यनियमेन शेषभूताः प्राप्तास्तानेव प्रतियथाप्राप्तरूपान्नियम्यंत इति न लक्षणा। साधनद्वा
रेण तु तादर्थ्यं निसोक्तादिति लक्षणा वा चोयुक्तिभिर्व्यवार्तिकयोः। यथाप्राप्तानां चानिय
म इति शाखांतरगतैः सोमैः शाखांतरीयं निधनं न प्रयोक्तव्यं। किंतु तत्तन्निधनसहित
एव सोमैर विशेषस्तात्तत्फलार्थं न प्रयोक्तव्यः। तस्मात्फलांतरार्थं निमैव हौपादयो गुणाः।
विधीयंते नियम्यंते यथाप्राप्ते तु सोमे॥१॥ इति शास्त्रदीपिकायां द्वितीयाध्यायस्य द्वितीयः
पादः॥ गुणस्य कतु संयोगात्कर्मांतरं प्रयोजयेत्संयोगस्याशेषभूतत्वात्॥ ज्योतिष्टोमं
प्रकृत्य श्रूयते। यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान्ग्रहान्गृह्णीयात्। यदि

वृहत्सामाश्रुत्वा ग्रा ग ग्रहणीयादिति तत्र संशयः। किं ज्योतिष्टोमाख्ये कर्मणि रथंतरसामा
वृहत्सामेति विधीयते। किं वा ज्योतिष्टोम एव रथंतरेण वृहता वाऽवच्छिन्नो ग्रहाग्रताऽवि
शेषं प्रति निमित्तत्वेनानुकीर्त्यते। तदर्थमिदं चिंत्यते। किमयं रथंतरक्रतुसंयोगो रथंत
रादेः उताऽस्य क्रतुसंयोग इति। तदर्थमपि किं रथंतरविशिष्टः क्रतुरिह निमित्तं
उत क्रतुविशिष्टं रथंतरमिति। तत्रान्यार्थप्रधानत्वाद्दृकुद्धी हि निमित्तता। रथंतरवि
शिष्टस्य क्रतोरेवावगम्यते।१। विशेषणं व्यवच्छेदविशेष्यव्यापि चोच्यते। ज्योतिष्टोमे
च नान्येषां व्यवच्छेदस्य संभवः।२। रथंतरेण क्रतोस्तस्य क्रतोर्व्याप्तिश्च नैव हि। संत्यन्या
न्यपि सामानि गायत्रादीनि तत्र हि।३। तेन व्यवच्छेदाऽभावात् सत्तयापि वऽव्यापिन्यो सा
मांतरसापेक्षतया विशेषणत्वासंभवात् पूर्वत्राऽसंभवी रथंतरसामत्वं गुणः क साम
र्मांतरं कल्पयति। यदि शब्दश्रवणनिपातनात् क्रमेनार्थको रूप्यध्याहारादिना वाक्यैकत्वे यद्गृ ५२
तिप्राप्ते विधीयते।। यदि शब्दात् प्रकरणाच्च ज्योतिष्टोमस्याभिधानं। न च सामांतरत्वे

छेदेनैवरथंतरस्यविशेषणत्वं।शब्दोहिस्वार्थसत्तामेवप्रथमंबोधयति।यदिसानित्यप्रा
प्तास्मान्नतत्तस्याःप्रतिपादनमनर्थकमिस्वर्थांतरव्यवच्छेदंकुर्यात्।इहतुरथंतरसत्तायाः
पाक्षिकत्वात्तत्प्रतिपादनेपिनानर्थक्यमितिसत्ताव्युदासेनसत्तायैवात्रविशेषणत्वला
५४ भान्नकर्मांतरे।यद्यपिसामांतरमेव्यवच्छेत्तव्यंतथापिवैकल्पिकयोर्बृहद्रथंतरयोर्विरो
धिनोःपरस्परव्यवच्छेदेनैवविशेषणत्वंनाविरोधिनांसामांतराणांव्यवच्छेदनाययथा
नीलोत्पलमितिपीतादीनांव्यवच्छेदोनतुदैर्घ्यादीनां।नचरथंतरस्यसामांतरापे
क्षत्वं।अनपेक्षस्यैवपृष्ठस्तोत्रसाधनत्वेनज्योतिष्टोमान्वयात्।तेनयद्यपिरथंतरवि
शिष्टःक्रतुरिहनिमित्तंतथापिप्रकृतस्यैवाभिधानं।अथवाक्रतुविशिष्टंरथंतरमिहनि
मित्तं।अनित्यत्वात्।नित्यस्यक्रतुर्ननिमित्तंभवितुमर्हति।तेनयद्यपिबहुव्रीहिणारथं
तरविशिष्टःक्रतुरेवाभिधीयतेतथापिद्वन्द्वाज्जुहोतीतिवत्विशेषणपरत्वात्तस्यैव

निमित्तत्वं प्रथमप्रतीतं च रथंतरमुख्यत्वं यद्यपि शब्दोपक्रान्तनिमित्तत्वप्रतीतिर्न क्रतुं पावक्र
प्रतीतिरथंतरमेव निमित्तं तच्च ज्योतिष्टोमेप्यस्ति तस्मान्न कर्मान्तरं ॥ एवं वेष्टोपक्रमसंयो
गात् क्रतुप्रधानमुच्यते ॥ राजसूये राजकर्तृके अवेष्टिर्नामेष्टिः समाम्नाता ॰ आग्नेयम
ष्टाकपालं निर्वपति हिरण्यं दक्षिणेत्यादिकां तां प्रकृत्य श्रूयते ॰ यदि ब्राह्मणो यजेत बार्ह
53 स्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत् ॰ यदि राजन्य ऐंद्रं ॰ यदि वैश्यो वैश्व
देवं ॰ इति तत्र संशयः ॥ किं ब्राह्मणादीनामवेष्टोपात्तानां मध्ये निधानविशेषं प्रति निमित्ता
वणा४ र्थानि श्राँनि उताऽप्राप्तानां प्रापकाणीति ॥ तत्सिद्ध्यर्थमिदं विचार्यते ॰ किं राजसूये त्रयाणाम
पि ब्राह्मणादीनामधिकारः उत क्षत्रियस्यैवेति ॥ तदर्थं च किं राजसूयाधिकारगतो राम
राजशब्दस्त्रयाणामपि वाचकः ॥ किं वा क्षत्रियस्यैवेति ॥ ततोपि पुनर्विचारयितव्यं ॰ राज्य ५३
कर्तृत्वनिमित्तो यं राजशब्द उत क्षत्रियत्वजातिनिमित्तो वेति ॥ यदि राज्यकर्तृत्वनिमित्त

स्ततस्तद्योगिनांत्रयाणामपि वर्णानामधिकारवाक्यस्थराजोपपदोपादानतः प्राप्ते
निमित्तार्थानि ब्राह्मणादीनांत्र्यवर्णानि। अथ जातिनिमित्तस्ततोऽतज्जातीययोर्वैश्यब्रा
ह्मणयोराजोपपदवशेनाऽर्थान्निवृत्तेरप्राप्तानां ब्राह्मणादीनां प्रापकाणि। तत्र राज्यनि
मित्तोयमार्यावर्त्तप्रसिद्धितः सर्वलोकप्रसिद्धत्वात् अविगानाच्चावगम्यते। क्षत्रिय
त्वनिमित्तत्वमनार्येष्ववगम्यते। द्रविडेषु विगीतं च तदन्येषु प्रसिद्धितः॥२॥ तेन राज्ययो
गाद्राजानेस्त्रयोपि भवंतीति। राज्यपदे तु रूढ्या जनपदरक्षणवाचि। न राज्ययोगमपे
क्षते। ननु राजयोगाद्राज्यमभियुक्ताः स्मरंति। तस्य कर्मणीत्यधिकृत्य पत्यंतपुरोहिता
दिभ्यो यगिति वचनात्। राजशब्दस्य तत्र पाठात्। आचाराच्च स्मृतेर्बलीयस्त्वमवास्थि
तं। उच्यते। लोकप्रयोग एव शब्दार्थावधारणे प्रमाणं। स्मृतेरपि स एव मूलं नान्यदस्ति।
प्रयोगाच्च राज्यशब्दस्यैवस्यात् तंत्र्यं। तन्निमित्तत्वं च राजशब्दस्यावगम्यते। ततस्तदनुसा

रेण स्मरणं साध्वसाधुशब्दविभागमात्रपरं व्याख्येयं। अतस्त्रयाणामपि राजपदाभिधेय
त्वेन राजसूयेऽन्वयानां निमित्तार्थानिश्चवण नियदिशब्दसामर्थ्यादप्येवमेवायदिशब्दो
हि राजशब्दस्य राज्ययोगनिमित्तत्वे प्रमाणं। अन्यथा हि प्राप्त्यभावाद्यदिशब्दोऽनुपपन्नः स्या
त्। वैदिकश्च निर्देशः स्मृतेरपि बलीयान्। तस्मान्निमित्तार्थानीति प्राप्ते ब्रूमः॥ न तावत्
वैदिकनिर्देशादत्र निर्णयः शक्यते कर्तुं। अन्यथापि तस्य ज्ञावात्। राजानमभिषेचयेदि
ति ह्यभिषेके विधौ प्रागेव राज्ययोगाद्राजशब्दः क्षत्रियमात्रे वेदे प्रयुक्तः। तेन रूढमेव
राजपदं निर्णीयते। यदिशब्दस्तु निपातत्वाद्यथाकथंचिदपि नीयमानो न दुष्यति स्म
रणाच्चैषस्य तन्त्रमेव राजपदं। न च तस्य निर्मूलत्वं। द्रविडप्रयोगस्य मूलस्य संभवात्।
अतो नाऽयथार्थत्वे स्मरणस्य प्रमाणमस्तीति तेनैवाभियुक्तप्रणीतेनाचारस्य संभ राम ५८
वान्नेण मांत्यादिप्रयोगप्रसूतस्य बाधाद्राजयोगादेव राज्यशब्दः। स्वतन्त्रस्तु राजशब्दः

54

सचिवयवचन इति ब्राह्मणादेः अवेष्टेप्राप्य भावात्प्रायकालिवचनानीति॥ ॥आधाने स
र्वशेषत्वात्॥ इदमाम्नंति॰ वसंते ब्राह्मणोग्निमादधीत ग्रीष्मेराजन्यः शरदि वैश्य इति त
था वसंते ब्राह्मणमुपनयीत ग्रीष्मेराजन्यं शरदि वैश्यमिति। अत्रापि सएव विचारः किं ब्रा रः
ह्मणादीनांकिंवा ब्राह्मणादीनामप्राप्तमाधानमुपनयनं च विधीयते तत्र विद्याग्निसा
ध्यत्वा क्रतूनां तदुपाययोः प्राप्तत्वाद् ब्राह्मणादीनां निमित्तार्था पुनः श्रुतिः।१॥ आहव
नीये जुहोतीति वाक्यादग्निसाध्यत्वे क्रतूनां आहवनीयश्चाधानैकसाध्य इत्यर्था
दाधान प्राप्तिः। ज्ञान पूर्वकत्वाच्चेतन प्रवृत्तेः क्रतुज्ञानस्य च वेदाध्ययन साध्यत्वा
द्वेदाध्ययनस्य चोपनयनमंतरेणासंभवादुपनयनस्यापि क्रतुभिरेवार्थात्प्रा
प्तिः। नन्वलौकिकत्वादाहवनीयादीनां विधिमंतरेणाधानसाध्यत्वानवगतेः कथं क्र
तुभिरर्थादाधानस्याक्षेपः तथापि वाक्येयमाधानविधिषु वसंतादिषु आहवनीया

55

दिपदाश्रवणादाधानसाध्यत्वावगमः स्यात्। यदि तु नक्षत्रं गार्हपत्यमादधाति दिवाहव
नीयं। त्रिभिर्गार्हपत्यमादधाति पंचभिराहवनीयमित्यादिगुणवाक्यपर्यालोचनेनैतत्
ज्ञायते नूनमाधानोधानमाहवनीयादिशब्दाभिधानीयकमित्युच्यते तन्नमापित्
त्वे। अतोग्निविद्यासाध्यैः क्रतुभिस्तदुपायभूतयोरुपनयनाधानयोराक्षेपतः प्राप्तिः।
अथवा य एवं विद्वानग्निमाधत्त इति सामान्यतः सर्ववर्णानां आधानस्य विधायकं
गुणानपहत्त विधिशक्तिकमस्ति वचनं। यस्मिन् गुणापहृत्त विधिशक्तेयो वसंतादि
विधयो ब्राह्मणादिनिमित्तकालमात्रं विदधति। तस्मान्निमित्ताधीनि श्रवणानीति
प्राप्तेक्रमः। न तावत् क्रतुसामर्थ्यात् प्राप्तिरेकांतिकी तयोः। सामान्यवचनं यत्त द्दर्शमाना
पदेशकं। १। वसंतादिवाक्येषु तावद्यदि शब्दाद्यभावाद्वाक्यांतरविहिताधानोपनयन राम
विपरिवर्त्यमावाच्चक्रियाविधिरेव प्रतीयते। तो यदि सामान्यतः प्राप्तिः स्यात्तदा बल ५५

त्रिभिरार्थतास्यात्तान वसीप्राप्तिः। क्रतुविधयस्तावदग्निविद्यामात्रसाध्याः। अन्यय
स्कः यद्यप्याधानसाध्यास्तथापि न ते नैव सर्वैर्निष्पाद्याः। अन्येन निष्पादिता नामप्य
न्येन क्रयादिभिरपि प्राप्तिसंभवात्। तथा विद्यापि पुस्तकनिरीक्षणाद्युपायसंभवान्नै
कोत्तेनोपनयनमाक्षिपति। तत्रास्ति विधेरवकाशः। सामान्यवचनं तु वर्तमानापदेशस
रूपं न वसंतादियुक्तप्रत्यक्षविधौ सति क्लेशेन विधित्वमापादयितव्यं। तस्माज्ज्ञापकाणि
वचनान्याधानोपनयनयोः॥ अपनेषु चोदनांतरसंज्ञोपबंधात्॥ दर्शपूर्णमास
प्रकरणे श्रूयते। दाक्षायणयज्ञेन स्वर्गकामो यजेत। तथा साकंप्रस्थायीयेन यजेत
पशुकाम इति। तत्र विचारः। किं कर्मांतरविधिः उत दर्शपूर्णमासयोरेव गुणात्फ
लमिति। तदर्थं च किं दाक्षायणादिशब्दो गुणविधिः। कर्मनामधेयं वेति विचारः। तत्रैवं
विधसंज्ञकस्य गुणस्य लोके अप्रसिद्धत्वात् उद्भिदादिवत् सामानाधिकरण्येन नाम

धेयत्वं॰ तच्च भेदकं ज्योतिरादिवत्। अपि च अस्य नामत्वेनाविधेयत्वात् गुणांतरस्य
च विधेयस्याभावात् फलस्य चाविधेयत्वात् कर्मैव विधीयत इत्यभ्यासादपि भे
द इति प्राप्ते ऽभिधीयते। स्यादेवं नामधेयत्वे गुणस्य च विधीयते फलाय साकं प्र
स्थानं भावयति थ्व्रेत्यभिधीयते। ११। नामत्वे संज्ञा लक्षणोऽभ्यासलक्षणो वा कर्मभेदः
स्यात्। गुणविधिस्त्वयं। यद्यपि न लोकप्रसिद्धो गुणस्तथापि वाक्यशेषात् अवयवव्यु
त्पत्त्यावो आवृत्तिसहप्रस्थानलक्षणगुणवचनत्वमनयोरवगम्यते। अतो गुण एव प्राप्तो
ऽवश्यं विधातव्यो यागस्तु प्रकृत इति तदाश्रयेण गुणमात्रं फलाय विधीयते दध्यादिव
त्। न तथैव दध्यादेरर्थांतरत्वं तत्रूढत्वान्न नामधेयत्वं॰ एवं दाक्षायणादिशब्दानां दर्श
पौर्णमास्याविष्ट्यादि वाक्यशेषदर्शनेन दार्शपौर्णमासिकगुणवचनत्वावगमात् त
द्दर्शनेन च धातुपारार्थ्यादेराश्रयणीयत्वान्नोद्भिदादिवत् कर्मांतरवचनत्वं संभवति।

56

राम ५८

त्यकर्मभेदः॥ ॥संस्कारश्चाप्रकरणोकर्मशब्दस्यात्॥ दर्शपूर्णमासयोरेषामाल
भेत· तथाचतुरोमुष्टीन्निर्वपतीति· तथाऽनारभ्यकिंचिच्छ्रूयते· वायव्यंश्वेतमालभेतभू
तिकामः· सौर्यंचरुंनिर्वपेद्ब्रह्मवर्चसकामइति। तत्रसंदेहः। दार्शपौर्णमासिकयो
रेषालंभमुष्टिनिर्वापयोःश्वेतचरूगुणौविधीयेते· किंवाकर्मांतरेयावद्गुणेनिर्व
पणमालंभनंचगुणफलविशिष्टे· किंवायागविधानमित्तरत्रेतरत्रेति। तत्रविधि
गौरवात्नकर्मांतरविधानंयागस्याश्रुतत्वाद्द्वरभ्रष्टः। नचासतियागेदेवता
त्वंवाय्वादीनांसंभवतीतिनसर्ववक्षाणांवायुसंबंधात्कथंचिदीषायाएववाय
व्यमित्यनुवादः। सोर्यमितिचाग्नेयस्येवतेजोदेवतात्वसामान्यात्। अतोदार्शपौर्ण
मासिकयोरालंभनिर्वापयोर्गुणविधीयदालभेततत्श्वेतमिति· यन्निर्वपेततच्च
रुमिति। चरुशब्दस्यात्राविवचनात्। सप्तम्यर्थेच द्वितीयास्यात्यांनिर्वपतीत्यर्थः। भू

57

तिब्रह्मवर्चसकामशब्दोसार्वकाम्यप्राप्त्यनुवादवितिानेनयुक्तं।नहि फलपदयोर्नित्यवत्
श्रुतयोःसंभवत्युपाजनयोश्चप्राप्तिकानुवादत्वमानर्थक्यंचयुक्तमंगीकर्तुं।तस्माद्गुण
फलविशिष्टंकर्मांतरंयावदुक्तंविधीयते।लोकेपिचालंभनादिसंभवान्नैकांततोदा
र्शपौर्णमासिकयोःप्रतीतिः।देवतापदंतुसर्वत्रयथाकथंचित्तेनेतव्यमितियागस्या
श्रुतस्यविधानायोगात्तदभावाच्चदेवतान्वयाऽसंभवादिति।तस्माद्यावदुक्तकर्मांत
रविधिरितिप्राप्तेब्रूमः।देवतापदवैयर्थ्यंयावदुक्तविधौभवेत्।तेनतत्कल्पितोयागोवि
धेयोत्रश्रुतोपिसन्।१।नहियदेवप्रत्यक्षपठितंतदेवैकंशाब्दं।सामर्थ्यमपिहिशब्दै
कदेशइत्युक्तं।अतोत्रद्रव्यदेवतासंबंधकल्पितोयागोविधीयते।तदयंवाक्यार्थः।
श्वेतमालभेतवायुदेवत्यंकुर्यात्भूतिकामइति।तत्रचालभतेरनुवादः।चोदका
त्प्रर्थादाप्राप्तत्वात्।वायव्यंश्वेतंकुर्यादितिएतावद्विधीयते।नचांतरेणयागंवाम

राम
५७

व्यः शक्यते कर्तुमिति याग एवायमेवं विहितो भवति तस्मात् याग एव गुणफलविशिष्टो वि
धीयते॥ ॥विषये प्रायदर्शनात्॥ ॥अग्निहोत्रदोहाधिकारो वत्समालभेत इति श्रुतं त
त्रा सत्यपि देवतासंयोगे आलिङ्गव्य कालं भव सामान्याद् अत्रापि यागविधिः कल्प्यते॥ तस्या
तरं· आलंभो नाम स्पर्शनमात्रं· न तस्य यागमंतरेणाऽनुपपत्तिः लोके विदृष्टत्वात्॥ अ
तोऽत्रालंभनमात्रं वत्ससंस्कारो विधीयते॥ ॥संयुक्तस्य पर्यशब्देन तदर्थः श्रुतिसंयो
गात्॥ ॥चरुमुपदधाति· बृहस्पतेर्वा एतदन्नं यन्नीवारा इत्यत्रापि किं चरोर्यो विद्युक्तमुप
धानमात्रं उत याग इति संशयः। तत्र बृहस्पतेर्वा एतदिति कथं बृहस्पतेः स्यात् यद्यसौ
देवता न स्यात् संबंधांतराभावात्· तैत्तिरीयाणां तु बार्हस्पत्यो भवतीति तत्र हि तेनैव वाक्य
शेषे देवतात्वमुक्तं। अतो वाक्यशेषाव×× गतदेवतासंबंधबलेन यागार्थता चरोः। उप
धानं तु यागोपयुक्तस्य प्रतिपत्तिः स्विष्टकृदादिप्रत्याम्नानेनेति प्राप्ते ब्रूमः॥ विध्युद्देशाप

क्षित्ता विशेषा वाक्यशेषादवगम्यते। ना॰ नपेक्षितः। चरुश्च प्रधानेनैव स्थलनिर्देशोपयिके
न निराकांक्षो नार्थांतरमपेक्षते। न चोपधानस्य यागवद्देवताकांक्षा। यतो वाक्यशेषावग
ता देवता गृह्येत। तैत्तिरीयवाक्यमपि बार्हस्पत्यो भवतीति विधीयमानापदेशकं न देव
ताविधिपरं। अतोऽर्थवादमात्रं वाक्यशेष इत्युपधानमेव चरोः न यागः॥ ॥ पात्नीवते तु
पूर्ववत्वादवच्छेदः॥ ॥ त्वाष्ट्रं पात्नीवतमालभेतेति प्रकृत्य। पर्यग्निकृतं पात्नीवतमु
त्सृजंतीति श्रुतं। तत्र संशयः। किं पर्यग्निकरणं तांगमिति गुणविधिः उत तत्संस्थयागां
तरविधिरिति। तदर्थं च किं पर्यग्निकृतं पात्नीवतं कुर्यादित्यन्वयः उत पर्यग्निकृतमुत्सृ
जंतीति। तत्राव्यवहितसंबंधलाभात् पर्यग्निकृतं पात्नीवतं कुर्यादित्यन्वयः। न तु पर्य
ग्निकृतमुत्सृजंतीति। व्यवहितकल्पनादोषात्। न च पात्नीवतशब्दात्सर्वयागप्रत्यभिज्ञा राम ५८
नं। त्वष्टा हि पत्नीवांस्तत्र देवता। न केवलः पत्नीवान्। अतो यथा आग्नेयमित्यग्नीषोमी

यादेरग्रहणं तथात्रापि। नच पूर्ववत्र विधेयः कश्चिद्‌दगुणः संभवति। न तावत्पर्यग्निकरणं
चोदकप्राप्तत्वात्। नोत्सर्गः तस्याप्युत्पत्तिवाक्यसिद्धत्वात्। पर्यग्निकरणविशिष्टपात्नीवतो
द्देशेनोत्सर्गविधौ विशिष्टानुवादाद्वाक्यभेदः। नच पर्यग्निकृतानुत्सृजंतीति क्रमः। तस्या
पि चोदकप्राप्तेः। नच पर्यग्निकरणांतांगकलापः। तस्यापि सिद्धत्वात्। नोत्तरांगपरिसंख्या
त्रिदोषत्वात्। तस्मात्कर्मांतरमिति।। अत्राभिधीयते। पात्नीवतशब्दस्तावल्लिन्नो तास्थायि
शब्दवत्तशक्तोऽन्यत्र पूर्वयागमुपस्थापयितुं। नचात्राग्नेयवदसामर्थ्यादुत्पत्तिवाक्य
स्थाश्च पात्नीवतमिति प्रत्येकमुत्पन्नस्तद्धितः प्रत्येकमेव देवतात्वं गमयति। नत्वग्नीषोमीया
दिवत्समासादुत्पन्नस्तद्धितः येन व्यासक्तं सापेक्षं देवतात्वं स्यात्। नच प्रत्येकमपि देवता
त्वे विकल्पः। युगपदेकेन वाक्येन विधानात्। स्मृतो यथा डित्थो डपित्थयोर्जाता डित्थमातेति
शक्यते वक्तुं तथा पात्नीवतमिति। सति चैवं प्रकृतप्रत्यभिज्ञाने कर्मांतरं न युक्तं। अतउत्स

तिनापूर्वयागमनूद्यपर्यग्निकरणांतांगकलापविधिः। यद्यपि चासौ चोदकात्सिध्यतीति तथा-
पि ततः प्रागेव विधौ यत्नेन चक्रतोपकारेण निराकांक्षत्वात्तस्याः ?प्रयोगवचनः। ग्रहमध्य-
यवत्तु नातिदेशमपेक्षते। शंक्यो ?ति च पर्यग्निकृतशब्दः प्राकृतपर्यग्निकरणानुस्याद्वचनसं-
दंतांगेकलापगमयितुं। नहि सर्वांगोपकृतोपियमवस्था भवति। प्रकृतौ सर्गानुवादेनचां-
59 गरीति विधौ पात्नीवतशब्दो नियानुवाद इति न विशिष्टानुवाददोषः॥ ॥ अद्भ्यसोकेव-
लेकर्मशेषः स्यात्॥ ? बहवेह विषाहविर्यजते यो दाभ्यं गृहीत्वा सोमाय यजते। परा-
वा एतस्यायुः प्राण एति योंऽशुं गृह्णातीत्यनारभ्य श्रूयते। तत्र विचारः। किं ज्योतिष्टोमेग्र-
हणविधिः उत यागांतरविधिरिति। तदर्थं च किं अंशुमदाभ्यमिति यागनामनी उत ग्र- राम
हणनामनी इति। तत्र ग्रहणस्य संस्कारत्वादवघातादिवन्मध्ये याऽनर्हत्वाद्यागनाम- ५८
त्वे अदाभ्यं यजत इति। नाम च प्रकृतादपि नेदकमित्युक्तं किमुताऽप्रकृतादेव ज्योतिष्टोमात्।
ते

अंशोनुयद्यपियाजिनेष्वातस्तथापि संज्ञयैवतावत्कर्मांतरं कल्प्यते। तच्चगर्ग्यातिचोद
नासामान्यात्ज्योतिष्टोमप्रकृतिकमिति तदीयविध्यंतप्राप्तेर्द्रव्यदेवतासंबंधाद्यागो
न्तविष्पत्तितस्मो द्यागोन्तरइतिप्राप्त उच्यते॥ संस्काराणांननामान्तिवार्यते राजेशासना
त्। आनंतर्यादितः स्यातांग्रहयोरेवनामनी।१। अंशोतावत्तयजिनैवष्वातस्तन्नामताकृतः।
अदाभ्ये अंशुयमानोपि व्यवधानान्ननामभाक्।२। इहग्रहयोरेवभेदोनामवशाद्भवेत्।
ननुयागस्यतेनात्र विधीयेतेग्रहावुभौ।३। तयोर्गृहीत्वोपस्थानाज्ज्योतिष्टोमेनसंगतिः।
अपवादेतुयागोऽस्य नयोर्विनियोजकः।४। अस्तिप्रकरणेवाक्यं तेनतादर्थ्यमेतयोः। अदाभ्ये
अंशुयमानोपि गुणसंक्रान्तशक्तिना।५। विधिनानविधातव्योयागस्तेननसिद्ध्यति। अंशोरप्य
तदेवेति विधेयौकेवलौग्रहौ।६। ॥ अग्निस्तल्लिंगदर्शनात्क्रतुशब्दः प्रतीयते॥
यएवंविद्वानग्निंचिनुतइत्युक्तं। तथसामान्यपिवचनानि। अथोतोग्निमग्निष्टोमेनानुय

न

प्रथमवाक्य २ द्वितीयवाक्य २ इतेमादिविधीयत इस्वेता द्वितीया को टिः १

जतीति॰ तमुक्थेनेत्यादि। तत्र संदेहः। किमग्निं चिनुत इति यागविधिः उताग्निसंस्कारमात्रं चय
नं स्वतन्त्रं विधीयते। किं वाग्निष्टोमादिषु गुणो विधीयते। तदर्थं च किमग्निशब्दो यागनामधे
यं उत द्रव्यवचन इति। तत्राश्वदाभ्यवत् प्रकरणे पुनः संकीर्तनाभावात् न क्रत्वनुसंयोगः॰ तदभा
वे च संस्कारमात्रं स्वतन्त्रमनर्थकम्। अतोऽग्निं कुर्यादिति यागविधिः। चिनोतिः स्कन्दवत् कामिरग्निं चिनु
त इति वाक्यप्राप्तानुवादो निर्वपतिवत्। कथं पुनरसति यजिश्रवणे यागविधानं तदुच्यते। अग्निं
कुर्यादिति तावत् संज्ञायैव कर्मान्तरमवधारितं॰ अथातोऽग्निमग्निष्टोमेनानुयजतीति यदग्निं यज
तीति तदग्निष्टोमेनेति संस्थाविधिपरं वा वेच यजिनानुवादात् उत्पत्तौ यागवचनोऽग्निशब्द इ
त्यवगम्यते। यद्यपि नायं संस्थाविधिः॰ किं वाग्निष्टोमादिसंस्थेन यागेनाग्निमनुयजतीति॰ तथा
प्यग्नेर्यागत्वान्न त्वन्यथा तमन्वनेऽयं शक्यते॰ यथा देवदत्तमनुगच्छति यज्ञदत्त इत्युक्ते देवद
त्तोऽपि गच्छतीति प्रतीयते॰ अन्यथानुगमनानुपपत्तेः। एवमनुयजनवशादेवाग्नेर्यागत्वसि

60

राम
६०

द्धिः॥ तस्माद्यागविधानं स्यादिति प्राप्ते ऽभिधीयते॥ अग्नेश्चयनसंस्कारमात्रमत्र विधीयते।
तस्मात् प्राप्तेऽग्निमित्यादिवाक्यैः स्यात् क्रतुसंगतिः॥१॥ वह्नौ रूढोऽग्निशब्दोऽयं न हि यागस्य वाचकः॥ न
हि अग्निशब्दोऽत्यंतरूढत्वात् वाक्यभेदतत्प्ररव्यतद्व्यपदेशविधुरत्वाच्च यागनामत्वं प्रतिपद्यते
तेन ज्वलनस्यैवायं चयनसंस्कारो विधीयते। तस्य च संस्कारस्य क्रतुसंबंधपराणि
एतानि वचनानि· अथातोऽग्निमग्निष्टोमेनानुयजन्तीत्येवमादीनि। अत्राग्निशब्दः प्रक
रणाच्चयनसंस्कृतेऽग्नौ वर्तते· अनुशब्दश्चयनापेक्षया पश्चाद्भावमग्निष्टोमादीनामाह। न
न च यनसंस्कृतेऽग्नौ अग्निष्टोमादिभिर्यजेतेत्यर्थः। न त्वत्राग्निशब्दस्य यजिसमानाधिकरण्यं॥
येन यजिनाम स्यात्। न त्वावश्यं तुल्यरूपाणामेव पौर्वापर्यं· पाकमनुभुंक्ते इत्यादिविजा
तीयानामपि दर्शनात्। तस्मात् ज्यो तिष्टोमादिषु गुणविधिः॥ प्रकरणांतरे प्रयोजना
न्यत्वं॥ ॥गुणभेदप्रसंगो समाप्तः॥ ऽधुना प्रकरणांतरेण भेदोऽभिधीयते।

61

कुंडपायिनामयने उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति मासं दर्शपूर्णमासाभ्यां यजंते·
इत्यादिश्रुतं। तत्र संदेहः। किं नैयमिकाग्निहोत्रादौ मासो विधीयते किं वा कर्मांतरमिति। तदर्थं
च किमनुपादेयगुणसंबंधानुगृहीतोऽसंनिधिर्भेदकारणं भवति न वेति। तत्राग्निहोत्रशब्दे
न तत्कर्मोपस्थितेर्यतः। तस्मात्तत्रैव मासोऽयमप्राप्तत्वाद्विधीयते।५। उपादेयमनुपादेयं वा यद
प्राप्तं तदेव विधेयं· मासश्च तथा· यच्च प्राप्तं तदनुवाद्यं· अग्निहोत्रशब्दश्च स्वाभिधेयं कर्मोपस्था
पयति· तच्च प्राप्तं न विधेयं· अतो यद्यपि स्वभावतोऽनुपादेयं मासमुद्दिश्य कर्मोपादीयते तथा
अज्ञातज्ञापन ४ पि मासस्यैव विधेयो न कर्म। विधिनिबंधनश्च भेदो नोपादाननिबंधनः। तस्मादुपादेयमपि कृतिसाध्य
कर्म विधीयमानं न भिद्यते इति प्राप्तेऽभिधीयते। प्रकरणांतरे प्रयोजनान्यत्वमिति· किमिदं ४ राम
प्रकरणांतरमिति· अप्रकृताभिधानमित्यर्थः· कथं अप्रकृताभिधानं· उपसद्भिश्चरित्वेति वच
नात् नहि नैयमिकस्योपसदः संति· तेन ताश्च मासश्चेति भिन्ने कौ गुणः प्राप्ते कर्मणि न शक्य

प्रयुज्यत इति प्रयोजनं कर्म ३

तेविधानमितिकर्मांतरं।अत्र चाप्रकृताभिधानादेव प्रकरणांतरपर्यायाद्भेदः।अप्रकृताभिधानं
तु गुणादिति न गुणाद्भेदः।यथैव वाजिभ्यो वाजिनमित्यत्रापि अप्रकृताभिधानादेव प्रकरणां
तरपर्यायाद्भेदः।अप्रकृताभिधाने तु पूर्वकर्मसंयोगिनो गुणादिति तत्रापि प्रकरणांतरमे
व भेदकं स्यात्·न गुणः।तथा शब्दांतराभ्याससंज्ञाभिरपि अप्रकृतविषयत्वेव विधेर्बोध्यते· ५४
न साक्षाद्भेदः।स तु विधेरप्रकृतविषयत्वात्सिध्यतीति सर्वत्र प्रकरणांतरमेव भेदकं स्या
त्·न शब्दांतरादयः।अथैतेषामेतदेव भेदकत्वं यद्विधेरप्रकृतविषयत्वापादनं।एवं च
सत्यत्रापि गुणादेव तत्सिद्धेः स एव भेदकः स्यात् इति न प्रकरणांतरं शब्दांतरादिभिः सह
संख्यातुं युज्यते।तद्धि साक्षाद्भेदकं सर्वत्रान्ये तु तद्धेतव इति अतुल्यत्वात् कथं सहगणनं।
अपि च मासं दर्शपूर्णमासाभ्यां यजेत इत्यत्रानेकगुणाभावात् नाप्रकृताभिधानं सिद्धे
त्।तस्मान्नाऽप्रकृताभिधानं प्रकरणांतरं·किंतु·अन्यदेव गुणादिवत् अप्रकृताभिधान

हेतुभूतमितिवक्तव्यं।किंपुनस्तत्पूर्वकर्मसंनिधानं।कथंपुनस्तेनभेदसिद्धिः।उच्यते।कर्मसंनि
हितेनैवबुद्धौविपरिवर्तते।शब्दानुतदुपस्थानमुपादेयगुणोभवेत्।१।असन्निहितंतावत्कर्मबु
द्धौनविपरिवर्तते।तादृशमपिकथंचिज्जुहोतीतिप्राप्तवन्निर्देशेनदूरस्थमप्युपस्थाप्येत।यदिवि
धित्सितोगुणउपादेयःस्यात्।आहवनीयादिवत्।तत्रहिईदृशीवचनव्यक्तिःशक्यतेनिदर्शयि
तुं।यज्जुहोतितदाहवनीयइति।यत्रवाक्येऽनुपादेयोदेशकालादिकोगुणः।अतोनतत्रदूरस्थ
कर्मोपस्थानसंभवः।यत्कुर्यादित्येवंप्राप्तवन्निर्देशेनदूरस्थकर्मोपस्थानंस्यात्।तथाचतस्यो
देशान्मासस्तत्रोपादेयः।नचहोमानुरोधेनमासःसंपादयितुंशक्यते।तेनैवंवचनव्यक्तिः
योमासःतत्रहोमंकुर्यादिति।तेनशब्दस्वरसतःप्राप्तोपस्थानानवगमात्संनिधानाभावा राम
च्चक्रियैवविधातव्येतिकर्मभेदः।एवंसरस्वत्यादक्षिणेनतीरेणाग्नयेपोष्टाकपालः।सत्राय
वगूर्यविश्वजितेतिदेशनिमित्तयोरपिद्रष्टव्यं।ननुनामधेयेनभवतिपूर्वकर्मणउपस्थानं।

नी
न्नवनुधानुर्थस्य·भावनानुते· न्नमानुपस्थाद्दि दूतएव धात्वर्थोपि यादृशो धात्वनाख्यात
वर्तिनापूर्वापरीभूतो विधेरुप· नीयते। नतादृशो नाम्नोपस्थाप्यत इति तस्यापियुक्तो भेदः। त
देपि भावनातावत् भिद्यत इति सिद्धं॥ फलचाकर्मसंनिधौ॥ ॥आग्नेयमष्टाकपालं निर्वपे
त्काम इत्यनारभ्याधीते· तथा त्रैधातवीयादीक्षणीयेष्टिमध्ये। तत्रापि पूर्ववत्संशयः। प्रा
क्तनाग्नेये फलविधिः काम्ये च त्रैधातवीये कर्मोत्पत्तिः दीक्षणीयाकार्यं यजमानसंस्कारं विधि ये
उत्कर्मान्तरविधिरिति। तदिह यः पूर्वत्र प्रकरणान्तरग्रहणात् तेदेव भेदकं नासंनिधानमात्र
मिति मन्यते· यो वा फलस्योपादेयत्वं मन्यते· शक्यते तद्दर्शपूर्णमासस्येनापि कामयितुं न
मासादिवदशक्यसंपादनमिति तन्निराकरणार्थमिदमधिकरणं॥ पूर्वत्राप्यविपरिवृत्तिका
रणाद्दासंनिधानमेव कारणं न प्रकरणान्तरं संदर्शितं व्याप्रियते। तत्त्वासंनिधानमेवा
प्यविशिष्टं। यद्यपि फलं शक्यते कामयितुं तथापि स्वरसादेव तत्कामसमुद्दिश्य साधनमेवा

अप्रकृतानभिधानसूत्रं सर्वविधिकरणं सर्वदशीमल २
सिद्धांते १

।सिद्धस्य कृतं पजनीसा तैव वशेषस्य संस्कार्यसमर्पणं वा भेदो वा ४

पादेयं न फलं। फलत्वव्याघातात्। विधीयमानं हि तदंगमेव स्यात्। एवं संस्कारेपि द्रष्टव्यं। न चा
ग्नेयेग्निहोत्रवत् नामधेयत्वमस्ति येनाऽभेदाशंकापि तावत्स्यात्। तस्माद् त्रापि कर्मभेदः॥ ॥
सन्निधौ त्वविभागात् फलार्थेन पुनः प्रवृत्तिः। स र्वेषामेव देशकालनिमित्तफलसंस्कार्याणाम
संपूर्णमासाय जेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेत। एतयान्नाद्यकामं याजयेत्। शेषाः स्थिष अवेष्या ४
63 न्निधिप्रत्युदाहरणार्थमिदमारभ्यते। समेदर्शपूर्णमासाभ्यां यजेत। तापौर्णमास्यां पौर्णमस्यां कर्त
समवयतीति। तत्र संशयः। कर्मसंनिधौ किं देशादिसंबंधे कर्मभेदो भवत्युत प्रकृतमेव कर्म दे
शादिषु विधीयत इति विचारः। किं प्राप्तं। अत्रापि तावद्देशादेरुद्देशात् कर्मतं प्रति उपादेयं त
थाच स्याद्विधेयं तेन भिद्यते। १। विधानमेवोपादानं नान्यत्। अत्र च देशादेरुद्देश्यत्वात् कर्माव रामं
श्यमुपादेयं। अतश्च विधेयत्वात्पूर्वं विहितस्य विधानयोगात् सत्यपि संनिधौ कर्मांतरमि
ति प्राप्ते ब्रूमः। संनिधौ त्वविभागात्फलं कर्मपूर्णमासेत्यभिधया। गम्यते तेन तस्यैव फलाद्यर्थापुनः

क्ॢप्तिः।१।निर्देशगतस्यातंत्र्यपारतंत्र्यात्मके उद्देशोपादाने·प्राप्त्यप्राप्तिवशौ तु विध्यनुवादौ·अ
तस्तयोस्ताभ्यां भेदादुपादेयमपि देशकालयोः कर्म पूर्वप्राप्तं तद्रूपमेव प्रत्यभिज्ञायते इत्यनु
वाद्यं·तस्य तु उद्देश्याभ्यामपि देशकालाभ्यां संबंधमात्रमप्राप्तमिति तन्मात्रं विधीयत इति न
कर्मभेदः स्यात्।अस्त्वेतावद्देशकालयोर्विधेयत्वात्कर्मणोऽनुवादः।निमित्तफलसंस्कार्याणां
वविधेयत्वात्कर्मणैव विधेयमिति भेदः स्यात्।सत्यं कर्म विधातव्यं तथापि तु न भिद्यते उत्पत्ति
विधिभेदे हि भेदो नास्ति च सोऽत्र नः।१।कर्मस्वरूपगतोऽपूर्वत्वप्रवर्तनमुत्पत्तिः।न चैकस्मि
न्कर्मण्युभाभ्यामप्रवृत्तप्रवर्तनं संभवतीति कर्मभेदः स्यात्।संभवति तु अन्येनाप्युप
दितस्यान्येन निमित्तादिसंबंधमात्रप्रतिपादनं·कर्त्तव्यतामात्रे ह्युत्पत्तिवाक्यादवगतं·त
त्र किंकस्मिन्निमित्ते कस्मै वा कामायेति विशेषापेक्षायामुत्पन्नस्यैव कर्मणो निमित्तका
र्तव्यता निमित्तवाक्ये प्रतिपाद्यते फलविनियोगः फलवाक्ये।संस्कारविनियो

69

ग्रुश्रुतद्वाक्यद्वयकर्मभेदः। आग्नेयस्तूत्पत्तिहेतुत्वादभ्यासेन प्रतीयेत। दर्शपूर्णमासयोर्यदा
ग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति कालद्वययुक्तमाग्नेयस्यैक
वचनं। अपरं तु यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवतीत्येककालयुक्तं। तत्र संशयः
किं उभयत्र विहितादाग्नेयात्कर्मान्तरं इदममावास्यायां विहितं उत तस्यैवानुवाद इति। त
त्राभ्यासात्कर्मान्तरं ननु तत्राऽविशेषाद्भेदः न हि तत्र एवं वक्तुं शक्यं अभ्यासार्थे न पुनःश्रुति
रेषेति विशेषाग्रहणात्सर्वे विधयः इह त्वस्ति विशेषग्रहणं कालद्वययुक्तस्येतरा पुनःश्रुतिः
संभवति। न च विपर्ययः पौर्णमास्याधिक्यादिति नैवं न हि तत्राविशेषाद्भेदः। समिद्वाक्य
स्य प्राथम्येन विशेषग्रहणान्नाविधिपुनःश्रुतिबलात्तत्र भेदः। किं चात्रापि न विशेषग्रह
णं। किं नु उभयकालयुक्तेन विहितस्येतरोऽनुवादः। किं वा केवलामावास्यायुक्तेन विहित
म.पूर्वविहितस्य वाग्नेयस्य। यत आग्नेयः उभयत्र कर्तव्यत्वात्क्लेशप्रदः अतएवं द्वाग्रः अ ग्राम ६८

सा

मायामेव क्रियत इति सुखप्रद इति प्रशंसामावास्यायामाग्नेयमनूद्येत रेण केवल पौर्णमासीयु
क्तानीय विधिरिति । तस्मात्कर्मांतरमिति प्राप्ते ब्रूमः ॥ कर्मणः प्रत्यभिज्ञानाद विभागः प्रतीय
ते ऐंद्राग्नस्य प्रशंसार्थात् तस्यैवेषा पुनः श्रुतिरिति ॥ ११ ॥ इति शास्त्रदीपिकायां द्वितीयाध्यायस्य तृ
तीयः पादः ॥ यावज्जीविको ऽभ्यासः कर्मधर्मः प्रकरणात् ॥ दर्शपूर्णमासाभ्यां स्वर्गकामो य
जेतेति काम्यप्रयोगं विधाय आम्नायते यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । तत्र संशयः । योयं
यावज्जीविको धर्मो विधीयते स किमभ्यासः कर्मार्थः उत नियमः पुरुषार्थ इति । पूर्वपक्षे काम
स्यैव प्रयोगस्याभ्यासविधिः । सिद्धांते प्रयोगांतरं नित्यं विधीयत इति भेदप्रसंगात् प्रयोगभेदा
भेदचिंता । तत्र कर्मांगविधौ कर्मणः कथंभावसंबंधात् प्रकरणानुग्रहः । पुरुषार्थविधौ तु तद
संबंधात् प्रकरणबाधः स्यात् अतो ऽभ्यासविधिर्यावज्जीवं यागमभ्यसेदिति । ननु तस्य कामेयो
णावशेन श्रुतेर्लक्षणार्थता न्याय्या । यावच्छब्दे च जीवनवाचिना तत्संबद्धः कालो लक्ष्यते । यजिना
च जीवपदे काललक्षणेवं प्रसज्येत । [illegible] यावशात् ॥ १ ॥ नहि प्रकर

नुयागाभ्यासः। नच्चैतत्न्याय्यं। तस्मात्जीवनेनिमित्तेपुरुषप्रत्यवायपरिहारायदर्शपूर्णमास
प्रयोगोविधीयते। जीवनंचयावद्विनिपातंनियतमितिनियतनिमित्तेसान्निध्येचविधी
यतेपुरुषार्थः। नामरूपधर्मविशेषपुनरुक्तिनिंदाशक्तिसमाप्तिवचनप्रायश्चित्तान्या
र्थदर्शनात्शाखांतरेकर्मभेदःस्यात्॥ ॥शाखांतरेषुकिमग्निहोत्रादिकर्मभिद्यतेकिं
वासर्वशाखास्वेकमेवेतिविचारः तत्राविशेषपुनःश्रुतिलक्षणात्अभ्यासात्द्विरुक्तलक्ष
णात्पुनःकरणात्तराद्भेदः। तथागुणादपिकश्चित्। ऐंद्राग्नमेकादशकपालंनिर्वपेदितिश्रु
तं। केचित्द्वादशकपालमिति। तत्रावश्यमन्यतरेणकर्मोत्पादयितव्यं। येनचोत्पादितंतद्गतो
गुणउत्पत्तिशिष्टइति। इतरस्यात्रनिवेशमलभमानोवाजिनवत्तत्कर्मांतरंकल्पयतीति राम
प्राप्तेब्रूमः॥ विधेःकर्मार्थतामात्रंपुनःश्रुत्यादिभिर्नैवेत। तावन्मात्रमिहापिस्यात्न ६४
तुभेदःप्रसिध्यति।१।पुनःश्रुत्याहिकर्मविधेयमित्येतावत्सिध्यति। विधिवशात्नुभेदः। वि ६५

65

हितस्य विधानायोगात्। एवमसन्निधावपि विपरिवृत्त्यभावात् कर्मविधानं। विधानाच्च भेदः। त
द्दिहापि कर्मविधिः पुनः श्रूयमाणत्वादिना सिध्येत्। न तत्र विधिवशादुद्देशसिद्धिः। विहितस्यापि पुरुषां
तरं प्रति विधिसंभवात्। यथा खल्वेकशाखागतमग्निहोत्रादिवाक्यमेकस्य पुरुषस्य विहितमे
वापरस्यापि विधत्ते नैककर्मान्तरं। एवमत्राप्यध्येतृभेदात्तत्तान्प्रति सर्वाण्येव वाक्यान्ये
कमेव कर्म विदधति नैककर्मान्तरं। एवमेकादशद्वादशकपालयोरुभयोरुत्पत्तिशिष्टत्वा
त्तेन बलाबलात् तस्माद्भेदः॥ शब्दान्तराभ्यासगुणाः संख्येनाम्ना च दूरेण चे सापवादः भेदः
क्रियाणामिति साधितोयमतः परं तद्विनियोगचिंता॥ ॥ इति श्रीपार्थसारथिमिश्रविरचि
तायां शास्त्रदीपिकायां द्वितीयस्याध्यायस्य चतुर्थः पादः॥ समाप्तोयमध्यायः। [illegible]
सवत् ५७४१ समये अश्विन मासकृष्णपक्षचतुर्थी सोमवारे समाप्तः॥ ॥राम॥ ॥

राम

शास्त्रदीपिकाद्वितीयाध्यायः

पत्रे ६६